नं० ५१-६

काव्यप्रकाशोदाहरणचन्द्रिका

नं० ५११९

पत्राणि १६० (सम्पूर्ण)

नं ५१८

२४

का० टी०
?० चं०
१

ॐ श्रीगणेशाय नमः ॥ ॐ नमः सरस्वत्यै ॥ निजभक्तधुरीणस्य गिरं क
ङ्करीयसीम् स्यम्भाराधिः कृताकारेन मामि कुलदैवतम् १ गंगो
ल्लसितमौलिसंधुक्षकल्लोललसितशेखरः सनतं यंगीकृतगलगरलो
जयति जयन्तीपतिर्जगति २ यत्पदाम्बुरुहद्वन्द्वमिलिन्दीकृतमानसाः
भक्ता भवन्ति सिद्धीनां सदनं तामुमां भजे ३ अनंगकुम्भयुग्मसांद्रविलि ग:
प्तचारुसिन्दूरपूररक्तवितरायगजाननाय हराननाविलग्नपर्वकिरीटरत्न
नीराजितांघ्रियुगलाय सदाननोस्मि ४ स्वाधायह्रदि वाग्देवीचरणाम्बु
जमादरात् कुर्वे प्रकाशसम्बद्धमुदाहरणचंद्रिकाम् ५ विरलानरूढ।
नाथ्याख्याः समालोच्य यथामति रचिता वैद्यनाथेन रामचंद्रात्मजन्मना ६
कृतिरेषा कृपावद्भिः साधुभिर्ध्वनिपारगैः गुणदोषविभागज्ञैर्निपुणोप
रिशोध्यताम् ७ स्वाधीनपतिका काचित्सकृदुपभुक्तेप्यपि वरोपकर
णादिस्थूलकाठान्यत्वा तेषामन्यं नोपादेयतां स्त्रवयन्ती सखीमाह यःकौ
मारहरइति अत्र हि शब्दस्ययद्यपीत्यर्थकतया अपि क्रियाध्याहारेणचं यः

राम
१

कौमारहरो वरः स एव वयप्राप्तास्ति चैत्रक्षपास्ता एव वयप्राप्ताः संति उन्मीलित-
मालतीसुरभयः प्रौढाः कदंबानिलास्ते च वयप्राप्ताः संति अस्मि च सैव वयप्रा-
प्तास्मि तथापि तत्र रेवारोधसि तत्र सुरतव्यापारलीलाविधौ चेतः समुत्कं-
ठते इत्यन्वयः कौमारं बाल्यं प्रसिकतया न द्वयस्यायामपि सम्भोगेच्छो-
त्पादनेन हृतवान् चोरितवान् इति कौमारहरः नच स्वाकृत्रिमप्रेमपात्र-
ताप्रकटनेनानुरागहार्दध्वननं क्रियते प्रियतेन स्वयमङ्गीक्रियत इति व-
रः तेनोत्तमयानुरागलाभः कौमारं नवयौवनमिति व्याख्यानेन स्वयमा-
लोच्य हृतो नतु पित्रादिपारतन्त्र्यात् कथंचिद्दापित इत्यर्थः निधिरत्नला-
पमा तत्तथा व्याख्यानेन मनोरमम् स एव उपभोक्तान्यो नेत्यर्थः द्विरागो-
योगमबह्वेदार्थ इत्यन्ये तथाच वयप्राप्तीत्यर्थाः हार्य्य चैत्रस्य क्षपा यामा चै-
यः तापहेति पूर्ववत् उन्मीलिता विकसिता या मालती तया सुरभयः शोभ-
नगन्धा मालती च वासंती नत जातिः चैत्रे तस्याः सम्भवात् प्रौढाः रसो-
द्दीपनादिसामर्थ्यशालिनः अतो मत्तत्वेऽप्यविरोधः कदम्बसम्बन्धी

का० टी०
उ० चं०
२

2

कदंबाख्यस्य पुष्पविशेषस्य संबंधिनः सर्वदिक्संचारत्वेन कदंबाकारावायु
निलावायवः वसंते कदंबान्तरस्यासंभवात् वसंते सकलकुसुमवर्णेन
स्मकविसम्प्रदायप्रसिद्धत्वादविरोध इति कश्चित् वसंतवनसमययोर्द्वयोर
प्यन्तराजयोर्ग्रहणमिति तत्सम्प्रदायचंडीदासः यत्तु दर्शितविरोधे सम्प्रदाय
मपश्यतां चैत्रेत्यत्रभाद्रे इति पाठकल्पनं तदकरीत्यागतिसम्भवादन्याय्यमे
व यत्तु तत्रदोषोद्भावनं वर्षर्तौ नदीतीरनिकुंजे स्मरत्ववर्णनादिति तदयुक्ते
कंठनिकुंजे तदनौचित्येपि तीरनिकुंजेऽनौचित्याभावात् मेघैर्मेदुरमित्यादौ
हृष्टत्वादिति दीपिकाकारः चोऽवधारणे तथैवेत्यर्थः अत्र च प्रौढा इति श्लिष्ट
विशेषणबलान्मालत्या निलयोनीयकनायिकाप्रतीतिः चकारोप्यर्थोभि
व्यक्रमः अस्मीत्यहमर्थकमव्ययम् अन्यथा सैवेत्यस्योद्देश्यालाभात् सैवे
तस्याः कण्ठेत्ववस्थान्तरनपाढेत्यर्थः तथापि एतेषामसकृदुपभोगेपि
तत्तेसुपभुक्तेऽत्यर्थकं सत्त्वमन्तत्रयेप्यन्वेति तेन स्मरतल्लीलाविधिरपिना
व्याहृतो येन क्रीडास्थानेकोप्युक्तः कण्ठास्यादिति ज्ञायते रेवायानर्मदाया

तिं^ सा

राम
२

च

रोधसि तीरे वेतसी वेतसलता विशालतया लतान्तराश्रयत्वेन सैव तरुस्तस्य तले। इतो वान्यस्तरुस्तस्य तलमधोदेशस्तस्मिन्सुरतानुकूलस्यापाररूपायाः लीलाकुसुमाभरणादिप्रसाधनादिरूपायास्तिनाश्लेषचुम्बनादिरूपा वा तस्या विधौ संपादने चेतोऽन्तःकरणं समुत्कण्ठते उत्सुकं भवतीत्यर्थः। अत्र च वरोपकरणादीनामनुपभुक्तत्वप्रसिद्धस्य कारणस्याभावेऽपि तत्कार्यस्योत्कण्ठारूपस्योत्पत्तिकथनरूपो विभावनालंकारः। वरोपकरणादीनामसंस्तुतोपादेयत्वेसाप्रसिद्धस्य कारणस्य विभावनात्। आत्मनः प्रकृतिविशेषो बहुकालस्य व्यवधानं वा रम्यत्कण्ठया विभावनीयमिति दीपिका। तत्र प्रकृतिविशेषस्यानुपयुक्तम्। सा चैवास्मीत्यनेन परिहृतत्वादित्यवधानव्यं अस्फुटत्वं चानुपभुक्तत्वाभावत्वेनाकथनात्। एवमनुपभुक्तत्वरूपकारणसत्वेऽप्युत्कण्ठारूपस्य कार्यस्याभावकथनाद्विशेषोक्तिरप्युत्कण्ठाभावत्वेनाकथनादस्फुटेत्युक्तम्। तत्र प्रदीपोद्योतक्रमम्। पार्यन्तिकास्वादहेतवस्यात्र विप्रलम्भः स्वाधीनपतिकायामपि क्रीडास्थानाप्राप्त्यादिना सुरतप्रतिबन्धे तत्सम्भवात्। सविसर्गगुरुरेफानुप्रासो विप्रलम्भे

का० सी०
३० चं०
३

3

यमाधुर्य्यानन्दगुणत्वाच्चमत्कारित्वेनास्फुटः एवं चैवं तपाः प्रौढाऽस्येतन्मध्य
गतत्वादुन्मीलितमालतीत्यस्याप्यस्फुटत्वेति केचित्तत्त्वेन्यस्य स्नानसमया
नुभूतइत्यर्थः तथा चानुपमक्रीडेवातीस्यात्यंतोपादेयत्वं चकोरोत्कंठैवात्रास्वाद्य
तइत्याहुः यत्र काचिद्देवातीरे परपुंसा कृतसंकेता तद्गलिंगोपर्यंतीसखीमाह
तितात्पर्यं वर्णनम् तदप्यल्लायुक्तम् रक्तपुत्रकावरोपकरणादीनामत्यंतोपा
देयत्वपरिपोषितविप्रलम्भास्वादतात्पर्यस्य स्वारसिकस्याहंडनेन तथात्वा
त्पर्यकल्पने प्रमाणाभावात् विच्छित्तिविशेषाभावाच्चेति दिक् १ नायका
न्यनायकोषितां तन्मुपभंज्यागतां दूतीं प्रति विदग्धोत्तमनायिकास्नानकार्य
प्रतिपादनमुखेन सम्भोगविह्नान्युद्घाटयितुमाह निःशेषेति च्युपि मिथ्या
वादिनि बांधवजनस्याज्ञातपीडागमे दूति इतो वापीं स्नातुं गतासि न पुनस्तस्या
धमस्यान्तिकं यतस्तव स्तनतटं निःशेषच्युतचंदनमित्यादिरन्वयः मिथ्या
वादिनि मत्पार्श्वागतत्वाद्बहुधा प्रसारितो पिनागतइति मिथ्याभाषणशीले बां
धवजनस्य मद्रूपस्य अज्ञातः स्वार्थपरायणतया नाकलितः पीडायाआगमः

राम
२

आगमनं यथा न तथा विधेहीति न त्वसत्यत्वे तेन मिथ्याभाषणशीलत्वं तस्या योग्यताव्य
ज्यते इतो ममान्तिकाद्वापीं स्नातुं गतासि स्नानकालानतिक्रमेऽलोभात् न पु
नरिति पुनरेवार्थे नेत्यर्थः तस्य बहुधा कृतापराधस्य अत एवाधमस्य परखेद
नानभिज्ञतया दुःखप्रयोजककर्मशीलस्य अन्तिकं समीपं तत्सीमान्तप्रसंगः इक्का
र्थे साधकमाह निःशेषेत्यादि तवैतत्समस्तं नतटादिभिः सर्वैरन्वयः यतस्तव
स्तनयोस्तटं प्रान्तसमदेशः निःशेषं च्युतं स्खलितं चंदनं यस्मात्तथाभूतं न तु
स्नानमन्यादि वापीगतबहुलयुवजनव्यापारवशात् संघट्टघर्षणात्स्खलि
तत्कारनिमज्जनलतायुगलेन तटस्यैवोन्नततया मृदुःपरामर्शात् अत एव चक्षु
नमित्युक्तम् न तटान्तमिति युवजनसंमर्दनेन तत्राप्यनवकाशात् सं
स्पर्शेऽत्र मर्दनाधिक्यात्तदेव तथाभूतमिति अक्रमेव एवमधरो निर्मृष्टरा
गः निःशेषः प्रोञ्छितरागोऽस्य सतथा इत्यत्रापि स्नानेन बहुलजलसम्बन्धात्
मलनरोष्ठः स्पृष्टतया तत्संबन्धमांद्यात् अंगसंपर्के तच्चुंबनकृतं तथा
त्वमिति किंच नेत्रे दूरमुपरिभाग एव अञ्जनं जनेषु अंजनरहिते स्नानकाले तु

का० टी०
उ० वं०
५

दृशाताम अञ्जनसंसर्गाभावात् अंगपदेपि प्रांतएव चुंबनविधानात् दंतजनितं
तु रंध्रस्यार्थमिति त्वसम्भव दुक्तिकमेव नेत्रमध्ये चुंबननिषेधात् तथा इयं तव
तनुः तन्वी कृशा अतएव शीतवशात् पुलकिता पुलकारोमोद्गमाः संजाता अ
स्याः सतथाभूता अंगपदे तत्तरतरसस्मरणात् पुलकोद्गमः असम्पूर्णार
तत्वादित्येके एवं विदग्धायामुक्तानामर्थयावाचोयुक्ता साधारणीष्वेतेषु।
वाक्यार्थेष्ववगतेषु विदग्धोत्तमनायिकात्वं तु शीलत्वादि रूपवक्तृबोद्धव्य
वैशिष्ट्यवत्वाद्धर्मपदार्थो तु तत्प्रयोजककर्मशीलत्वरूपः साधारणो वा
च्यार्थः तादृशायोतादृशाकर्म[illegible]रूपः तत्शीलत्वरूपेणावस्थितोऽ
जनयादूती संभोगरूपतादृशाकर्मशीलत्वाकारेण पर्यवस्यति अतएव
रूटितिव्यंग्यबोधकत्वाद्धर्मपदस्य प्राधान्ये वक्तृबोद्धव्यादिवैशिष्ट्यबले
विशेषाकारेण पर्यवसाने विलक्षाभावात् चंदनच्यवनादीनां तत्स्नानका
र्यतया निबद्धानां योग्यतया संभोगांगभूतानां चुंबनादिकार्यतया प्रतिस
धानेन मतितद्व्यंजनद्वारा संभोगगमकत्वमिति विशेषः अत्र च तत्त्वव्यक्ततया

राम
४

र्थं यद्यपि स्वर्गाधिष्ठसिनास्मि यत्र तत्रैवंविधे हृदयमनुरक्तास्मि तत्क्रमेव म
मैवंविधवंचनाजनितपरितापपात्रत्वमिति। श्रीहेतुकविप्रलंभसंप्रचारितं
वैदग्ध्यम्। तदनुरागणमहतीसंभोगः चंदनच्यवनादीनां चवाच्यानां च
स्थानं परिरम्भचुम्बनाद्यनुभावानां सम्भोगोत्कर्षहारेण श्रीजनकानां निर्वे गो॰
त्वम॰ दोत्कर्षवमिति हीतिलास्त्रयप्रथमप्रकरणैवं तत्र जातस्य कर्मणा वा भवति
न च जातस्यापकर्षेणोत्तमनायिकानायकस्य वक्ति। नापि स्वापराधपर्यवसा
यिहृतीसम्भोगादिहीनकर्मातिशयेन कर्मणा तादृशं वहृतीसम्बोधणा पर्यव
स्याचीनं सर्वसोढमेवेति नोद्घाटनादिमितीतरव्याहृत्यासंभोगरूपमेवस्य
नीमध्यमपदस्य प्राधान्ये निःशेषेत्यादिवाक्यानि सम्भोगविह्नोद्घाटनेन त
स्यस्याद्दायकमाचरति तथाहि उत्तरीयाकर्षणेन चंदनच्युतिरिमस्या
सिद्धिपरिहाराय निःशेषेति ततश्चंदनच्युतेः स्नानसाधारण्याच्चतेने
न संभोगविह्नोद्घाटनायतदग्रहणम् स्नानेऽपि सर्वं च चंदनच्युतिः स्यात्त
वतस्तनयोस्तटे उपरिभागपर्यवहस्यते इयमाश्लेषकृतैवेति तथा तांबूल

का० टी०
३० चं०
५

ग्रहणाविलंबात्प्राचीनरागस्य किंचिन्मृष्टं तत्त्वन्यथासिद्धिपरिहाराय निर्दिष्टेति
रागस्य निःशेषमृष्टतोक्ता पुनः स्नानसाधारण्यावर्तनेन संभोगचिह्नोद्घाटना
याधरइति उत्तरोष्ठे सरागे अधरमात्रस्य निर्मृष्टरागता चुंबनेनैवेति एवं प्रात
ईत्तमंजनं कालविलंबेन किंचिद्विलग्नमित्यन्यथासिद्धिपरिहाराय दूरमित्यु।
क्तम् दूरमत्यर्थमित्यापातलतोर्थः कालतः स्नानेन वा सर्वतो जनलोपः स्या
त् तव तु लोचनयोः क्वचित्प्रांत एवांजनत्वमिदं चुंबनकृतमेवेति पुलकि
ता तन्वी यं तन्वीत्यत्रापातनस्तन्वीति सहजतानवकीर्तनेन पुलकितेति स्ना।
नविक्षेपन्यासः पुलकितापि तन्वी वर्तत इति हृदि स्थितोन्वयः तेन च स्नाने।
न पुलकिता तनुः किंचिदुल्लसिता भवति इयं तु न तथेति रतिक्लेशजनिता वे
वमानवपुलकोद्गमो इति मर्मोद्घाटनं एवं मिथ्यावादिनी संबोधनमपि वंगा
न गतां एवं वनायकमानेतुं गच्छामीति मिथ्याभाषणरूपेऽर्थे पर्यवसतीति व्या।
चक्षुः अत्र वदंति यदिदं निःशेषेत्यादि वाचा नृत्वा कार्यानां स्नानव्याहृतिद्वा
रेणागंपासाधारणसम्पादनेनतत्र भंजनानुकूलं आत्मपरपर्यायस्य साधा

राम
५

रणस्यानुस्नानानुकूलतयाव्यक्तिप्रतिकूलत्वात् ग्रौस्मिन्दोषबहुलं चिंतेत्यादौ सा
धारणानामेवोनिप्रादीनां वक्त्रादिवैशिष्ट्यवशादर्थविशेषव्यंजकत्वस्वीकारा
त् किंचैवं निःशेषेत्यादिविशेषणवाक्यार्थानां वापीस्नानेबाधावतारात्स्नानंगता
सीत्यत्र विरोधिलक्षणया स्नानं गतासीति निषेधस्य तस्यांतिकं नगतासीत्यत्र च ग
तासीति विधेः प्रतीत्या गंतासीत्यंशस्य व्यंग्यत्वानुपपत्तिः नचवाच्यं विदग्धाया
स्नानकार्यत्वप्रकाशनमुखेनैव तत्प्रकाशने तात्पर्यात् अधरदंशलक्षण
वैधत्वेपिरंतमितिफलांशएवव्यंग्यत्वमितिचेन्न अधमत्वमपकृष्टत्वंजात्या
कर्मणावेत्यादिसंदर्भेण रमणान्वयानुपपत्तिवैधतायाउक्तत्वात् व्यंजनाग
म्यत्वेपिवाच्यानां निःशेषेत्यादिवाक्यार्थानामधमत्वस्य च भवदुक्तरीत्या प्रकारां
तरेणानुपपद्यमानतया वाच्यसिद्ध्यंगत्वेन रमणरूपव्यंग्यस्य गुणीभूतव्यंग्य
त्वप्रसंगात् तस्माद्वाच्यार्थसाधारण्यमेवोचितं विदग्धनायिकाप्रयुक्तनिः
शेषेत्यादिवाक्यार्थानां अधमत्वोक्तिरपि प्राचीनानामेव सोढानामपराधा
नां मम सह्यतां हंतीं प्रतिप्रतिपादयितुं न तु सम्भोगं विदग्धोत्तमनायिकायाः

का० टी०
उ० चं०
९
८

सर्वो समसंस्कृततया सम्यक्प्रकाशनान्नो विरुद्धादिति तदेतदापातरमणीयं दूषणं
ज्ञापनं आशयानवबोधात् तथाहि व्यंग्यतदितरकोटिसाधारणस्यैवाकार्यं ।
स्य व्यंग्यकोटिभूयःसहचारित्वग्रहो व्यंजनायामुपयुज्यते प्रायशःसंभावनास
मर्थो व्यंग्यबोधस्यापेक्षितं व्यंग्योत्कटत्वं च स्ववैशिष्ट्यादिनावसीयते प्रकृते च तत
टादिच्चंदनच्यवनादि संभोगैर्भूयःसहचरितमिति तेन तद्व्यंजनमिति तात्पर्यम्
सामान्यतश्चंदनच्यवनादि स्नानसाधारणं तटादिच्चदितं न स्नानेन भूयःसहचरि
तं किंतु संभोगेनेत्येवं साधारण्यव्याहतिरभिप्रेतान तु सर्वथा स्नानव्याहतिः ।
संभोगैकान्तिकता च येन प्रकाशादिविरोधः स्यात् इयमाश्लेषहृष्टैवेत्याद्येव
कारोपि संभावनाप्राचुर्यबोधको बहुधा देवदत्त एवायमित्यादिवत् अस्तु वा
स्नानव्याहतिरभिप्रेतान न तावता संभोगैकान्तिकत्वं आर्द्रवसनप्रोञ्छनेनापि
तथाविधचंदनच्यवनादेः संभावादिति नानुमानेन गतार्थता तथा सति वा
पीस्नानव्यावर्तने कः पुरुषार्थ इति चेत् व्यंग्यबोध एवेति ब्रूमः द्वयोः संभा
वितयोरेकव्याहतिबोधस्यापरोन्मेषहेतुत्वस्यानुभवसिद्धत्वात् अत एवोक्तं स्व

तस्य
मात्रे

राम
९

बुद्धिमिच्छेः तस्माद्वाच्यव्यङ्ग्ययोर्भयसाधारणोरेतरेकत्वावाधितोन्यत्र पर्यवसा

नीतिमेव॰

ज्यायइति यत्तु ज्ञानव्याहतत्वे विरुद्धलक्षणापत्यातदतिर्कं गतार्सीत्यंश
स्य व्यंग्यतावादानिरस्तुक्तं तत्रोच्यते स्यादेवं यदि ज्ञानव्याहतिर्वाच्यार्थंद
शायामवगम्येत वाक्यार्थप्रतीत्यनंतरं तु प्रतीतयात तया व्यंग्योन्मेषइति
न लक्षणावकाशः नरि तत्रमेव तथा विधमिति प्राथमिकबोधः तस्यत्व
र्थस्य किं विज्ञापयतीति इति तन्मायालोचनोत्तरभावित्वादिति न तत्प्रयुक्तज्ञान
व्याहतिबोधः अतएव दीपिकाकृता पदानां तात्पर्यार्थतया पर्युष यमा ना
नितस्यादित्येनैव तदनुकूलार्थव्यंजकानीत्युक्तानतद्यथाच्युतचंदनेत्यत्र

नतद्वालितं यदनं

योक्तं तनतनिम्नो व्रत भागोपि ति: शेषतो मस्पृशो गोनतीषत नाहृशष्या
धयोनपुनरुत्तरोपीत्यादिना नुकूलार्थप्रदर्शनं कृतम् अस्तु वा तदंशे ल
क्षणा रंतु मितिफलांशस्यैव व्यंग्यतया व्यक्तिवादिते: यत्र फलांशस्यापि न
व्यंग्यत्वसंभवः प्रथमतमपक्वमित्यादिना संदर्भेण भवतैवार्थापत्तिवे
द्यतया उक्तत्वादित्युक्तम् तदयुक्तम् तत्र प्रथमतमपक्वमित्यादिना ।

का० टी०
३० चं०

ग्रंथेन संभोगं विना धमत्वस्यानुपपत्तिरुच्यते किंतु नोत्तमनायिकावदिति नो
द्धारत्वाद् इत्यादिना वक्तृवैशिष्ट्यप्रतिपादनेन व्यंग्यपर्यवसानमात्रम् एते
न संभोगरूपव्यंग्यस्य वाच्यसिद्ध्यंगत्वेन गुणीभूतव्यंग्यत्वापत्तिरिति निरस्त
मिति कृतं पल्लवितेन यत्र उपनायकमाने तत्प्रेषितां तदुपभोगलक्षणं च
दूत्यादीन् वापीस्नानव्याजेन गोपयन्तीं दूतीं प्रति नायिकाया इयमुक्तिरिति
भूमिकारचनं तन्मनोहरं तथा सति स्नानस्य दूत्याभ्युपगतत्वेन तदु
पादकनिःशेषेत्यादिवाक्यस्यासंगतत्वापत्तेः संभोगप्रकाशनस्यापि
स्नानकार्यप्रकाशनमुखेनैव कर्तव्यत्वात् किंच स्नानतदंतिकगमनयो
र्द्वयोरपि दूत्या निवेदितयोरेकस्य सत्यत्वे ग्रपरस्यापि सत्यत्वमेव संभाव्यते
न तु मिथ्यात्वमिति न तदंतिकगमनस्य मिथ्यात्वोपन्यासो निर्बीजः एव स्यात्
दूत्यानभ्युपगतस्नानसाधनेन प्रकारकतया तदंतिकगमनस्य मिथ्यात्वो
पन्यासोपयुक्त इति सहृदयैराकलनीयमिति २ ग्रामतरुणमिति ग्रा
मतरुणं मुहुः पश्यन्त्यास्तरुण्या मुखच्छाया नितरां मलिना भवतीत्यन्वयः

ग्राम

१५

ग्रामे एकं तरुणं तेन दुर्लभत्वसूचनं ग्रामेति विशेषणेन निरंतरसंनिधानात्सं-
केतस्थानयोग्यतास्फेटातिशयो वा ध्वन्यत इति दीपिकाकारः एवं सति दिनांत-
रेपि संभोगमन्याशा निष्पत्तौ विलंबस्य लघुत्वापत्तेः पूर्वोक्तमेव ज्यायमि-
तिनव्याः ग्रामस्य स्त्रीसमूहस्य संबंधी तरुण इत्यर्थे स्तेनानेकनारीशाघ्य-
मानत्वं सूच्यत इति केचित् परिचितत्वेन मङ्गुर्दर्शनेपि शंकानुदयाय ग्रामे-
ति विशेषणमित्यन्ये मङ्गुर्वारंवारं जनताभयेन दर्शने सातत्यासंभवात्
पथ्यंतया भवतीति वर्तमाननिर्देशान्मध्ये दर्शनमलिनीभावयोरविरामः सू-
च्यते जनकीभूतदर्शनसमकालं तया कार्यसमत्वच्छायामालिन्यस्यक-
थनादतिशयोक्तिरलंकारः तरुणप्रुइति हृयोस्तरुणत्वोक्त्या परस्परानुरा-
गोत्कर्षो व्यज्यते छायाकांतिः नितरामतिशयेन केचित्तु मङ्गुरित्यस्य म-
लिना भवतीत्यनेनान्वयः तेन यदा यदा तदनुसंधानं तदा तदा नूतनापोत्क-
र्षान्मुखमालिन्यप्रकर्ष इति स्वरसइत्याहुः नवेत्यादि मलिनीभावोपपादकं
तरुणविशेषणं नवा नूतना वंजुलस्याशोकस्य मंजरी तया सनाथाग्रुके

का० टी०
३० वं
८
४

करोयस्मात्तथाभूतं अत्र न वेत्यनेन नूतनत्वहरणसौचित्येनाविनर्कनीयतास्त्वा
ताद्दृग्यात्रः नूतनस्पर्शिनो चित्येन शंकानुदयाय न वेति विशेषणमिति केचित्
उद्दीपनप्रकर्षायेति तत्स्वरसः एवं संकेतनिकेतविहरणनायकदर्शनकृतमा
लिन्यविषादरूपव्यभिचारिभावोत्कर्षव्यंजनमुखेन विप्रलंभाभासं पुष्णातीति
ति च स्वच्छंदेति मंदाकिनीवः मंदतां अपहाय भियादिति योजना मंदाकि
नी स्वर्गिगावः युष्माकं मंदतां मंदस्य मूढस्य भावो मंदता अज्ञानं पापमित्यन्ये
पापेनापकृष्टतामित्यपरे अपहाय रुदिति भियात्तन्नाशयत्वित्याशीः सञ्जा
तीयांतरादुत्कर्षप्रतिपादकं मंदाकिनीविशेषणमाह स्वच्छंदेत्यादि स्वच्छं
दं उच्छलत् अच्छं कच्छकुहरे च्छेतेतरं यद्वृत्तस्य छंदया अमृच्छंन्मोरोये पातैर्म
हर्षिभिर्हर्षेणाविहितेस्नानाह्निके यस्यामिति समासयोजना स्वच्छंदं स्वचा
पल्यं नत्ववातादिपरतंत्रं तेन जलवाहुल्यात् गांभीर्याभिव्यक्तिः स्वस्वच्छंदो भि
प्रायः इच्छा यत्र तथा उच्छलदिति क्रियाविशेषणं वा स्वस्वच्छंदेनोच्छलदि
तिवा अच्छं निर्मलं कच्छस्य जलप्रायदेशस्य कुहरे तरंगकृते विले छाता

राम
८

नद्धवल्लत्वात् तरत्तु वेगातिशयेन बलवदित्यर्थः क्वानमल्पमिति तु नस।
मकृस्यकंदोकलदित्यनेनैव बाहुल्यलाभात् इतरान् नमं वृष्टाविशेषणं
छातं सृस्वं नदित्तरादीर्घोऽत्यर्थ इति न कश्चित् श्रंवुनः जलस्य छटापरंप
रा मूर्छनलक्षणन्मोहो ज्ञानं अत एव रूषेः स्नानस्य प्राधान्यात् हृषम्यपस्या
मः यद्वा आह्निकवद्भिर्मूतस्यापि स्नानस्य लाभाय सः छटापरंपराकोति
वीतयामूर्छन्न प्रादुर्भवन् मोहो वै वितं विस्मयो येषामिति व्याख्यानं तु नश
हृस्वरसानुसारि एवं मूरूषिंसे सेवेतत्वेन तीर्थान्तराद्व्यतिरेकं प्रतिपाद्य न द्ये
तराद्युत्कर्षस्वभावकृतं प्रतिपादयितुं पुनर्विशिनष्टि उपदित्यादिना उ।
द्यंतः प्रकाशमानाः उदारा महान्तो दद्रुरा भेकाया यासु एवं विधा दर्यः कंदराः
यस्यां सा तथाभूता तरंगाभिघातैरुपरिभागभंगेन तासां प्रकाशनात्
तथा दीर्घायायिनाः प्रदरिद्राः शाखोदिबाहुल्येनातिशायेन्दुमास्तेषाम्
दन्योदीर्घेद्रुतिद्वेषात् डोरः पातनं तेनोद्रेकश्चाधिक्यं तन्मयास्तत्पुष्का ऊर्मि
यस्तरंगास्त एव मेदुरो निविडो मदो गर्वो यस्याः सा तथा मदोर्मीति पाठे ते

का० टी०
उ० वं०
५
१

नैर्देकोयेषामेवंविधायेमहोर्मयइतिव्याख्येयं दीपिकाकारास्तु दीर्घेति
भावप्रधानं तेन दीर्घत्वेनादरिद्रा इति लभ्यते यद्वा दीर्घ॑तं तमेकं मंदाकि
नीविशेषणं तथाच दरीषु दीर्घा विस्तृता इत्यर्थः अदरिद्रेत्यादि द्वितीयम
यद्वा तत्रापि नाकारप्रश्लेषः दरिद्रत्वं च प्रवाहसंबंधात्तुच्छमल्पतयाज्ञा
नत्वमित्याहु दर्दुरः पर्वतविशेषः अन्यथा कथं कुहरे इति पौनरुक्त्यापत्तेः
मंदाकिनी च गंगा नद्यंतरमेव तत्रैव दर्दुरगिरिसंबंधसंभवादिति कश्चि
त् इदं तु प्रसिद्धिविरोधादुपेक्ष्यं अनुप्रासोत्र शब्दालंकारः काव्यजी।
वातुः अभिप्रायवशौ छंदावित्यमरः आमांसो दुर्बलच्छात इति च मो
हः मिर्छतिमूर्छायामविद्यायां च समुच्छ्रयः इति विश्वः मूढाल्पापटुनि
र्भाग्यामंदा इत्यमरः विनिर्गतमि हयग्रीवनामा दैत्यो विस्तर[illegible]
घा०॰ नाहृत इति पुराणकथिते हयग्रीववधाख्ये नाटके हयग्रीववर्णनप्र
स्तावे पद्यमेतत् यं प्रेक्ष्य तं हयग्रीवं शत्रूणामानंदयति स्वं दयति मि।
त्राणामानंददातीति मानदस्तयाभूतं आत्मनो मंदिरात् स्तात्।

राम
५

नवनगरात् यदृच्छास्वेच्छयानन्तप्रयुक्तया विनिर्गतं निःसृतं नन्तम प्रस्थितं उ
पक्रान्तकर्णिकाधिकयाश्रुत्वा नन्दकृतमुखात् संभ्रमेण संभ्रमयेद्वेगेन अवार
नैश्चर्येण दौवारिकाह्वानेन विलंबासहनयास्वयमेवकृतं शीघ्रपातितनाय।
याकथंचिन्निविष्टानन्तविसर्जन निहितास्रर्गलाद्वारपिधानकाष्ठं यस्मा
त्तयाविथामरावतीनगरीभियानिमीलितसंकुचितनेत्राणीययासा
तयाभूतेवभवतीत्यन्वयः उपक्रान्तेतिपानक्रिययासमानकर्तृकत्व।
माश्रित्यबोध्यम् अत्रामरावतीनिशीथसमयकृतशीनाध्यवसानमूलो
त्प्रेक्षालंकारश्चमत्कारविश्रामभूमितिनीरसत्वमित्याहुः इतिश्रीम
त्सटवाकप्रमाणाभिज्ञनस्तरामहोराजवैद्यनाथकृतायामुद्राराक्षसचं
द्रिकायांप्रथमउल्लासः १ काचिदुपनायकसंगमार्थिनीशाकेंधनाद्या
नयनव्याजेनवहिर्गन्तुमन्तरंप्रमाद् मापकृति मातर्गृहोपकरणाव
लम्बनास्तीतिसाधितंत्वयातद्गणकिंकरणीयमेवमेवनवासरःस्थायी
तिसंस्कृतं भोमातःगृहसंबंधिउपकरणं उपक्रियतेनेनेत्युपकरणम् अ

का० टी०
उ० वं०
१०
10

॰॰ इंधनशाकादिसामग्री अद्यावल्लनिष्पन्नेतं नास्तीति त्वया साधितं प्रतिपादितम्
तत्तस्मात्किं करणीयं कर्त्तव्यं भण वद आज्ञापयेति यावत् यतो वासरो दिवसः
एवमेव अधुना दृश्यमानावस्थ एवं स्यात् यो स्थिरो नेति का कथार्थः अत्र नास्ती
त्यनेनालंघनीयाज्ञत्वम् गृहे इत्यनेनावश्यकत्वम् उपकरणमित्यनेनान्यथा
सिद्धिपरिहारः सकलस्य प्रतिदेशिगृहादपिलाभासंभवात् अद्यैवेत्य[illegible]
नेनाद्यैवसंपाद्यत्वं साधितमित्यनेन सत्वशंकाराहित्यं त्वयेत्यनेन स्वकल्प
नाविरहः तच्छब्देन हेत्वर्थेनावश्यवक्तव्यम् भणेत्यनेन स्वप्रेरणा एवमे-
वेत्यनेन निर्विनावसाने त्वं प्रेरणया अपि कुलांगनया मया न गंतव्यमिति त्वरया-
प्रेरयेति बाधोत्पत्ते वाकार्थेन तत्व कृवैशिष्ट्यादुपपत्तिसमागमार्थित्वमि
ति अत्नेन तु प्रत्यहं गृहकार्यव्यापृततया स्वैरविहारं कर्त्तुमसमाकाचिन्मात
रंपरयार् मापद्इति गृहोपकरणस्य गृहकार्यमद्य नास्ती न त्वन्यदा तत्र्या
एतायाममकदाप्यवसरद्इति प्रसंगशंकानिवारणं एवमेवव्यासंगं विना
तथाचव्यासंगं विना स्यात मशकपातात् गृहेच कार्याभावात् किंचित्कार्य

राम
१०

र्थैर्वरिः प्रेषयेतितात्पर्यार्थइत्याहुः इदंननदासंगछेतपरिवासरोनगछ।
तीतिपाठःस्यात् नचतादृशोपाठोभवद्भिरपिस्वीकृतः किंच कार्यस्याव
श्यकत्वेप्यतज्ज्ञापनं विनाननयाशंकाराहित्यंप्रत्युतानावश्यकतयाशंकैव
संभाव्यितेतिमाद्यैवज्ञापयसीति ५ साध्येतीति प्रियानुनयार्थंप्रहितां।
त्वमुपमज्जागतांसखींप्रतिनायिकायाइयमुक्तिः साधयंतीतिसखिसंभ
गंत्वरणोत्वरणोह्नासिमत्कृते सद्भावस्नेहकरणीयसदृशंतावद्विरचितंत्व
येतीतिपाठेपिसाधयंतीत्येवार्थः त्वरणेत्वरणोह्नासितितिव्रासिमत्कृते त्व
यातावत् त्वयातसद्भावमाधुर्यत्वेष्यासोवा स्नेहप्रसिद्धस्ताभ्यांकरणीयं।
कार्यंतत्सदृशंताभ्यांयादृशंकार्यंतादृशंविरचितंफलंतुदैवायत्तमिति
मुख्यार्थः केचित्तुसद्भावस्यकरणीयंस्नेहस्यसदृशंमयाचितमितियोजयंति
अत्रचज्ञातापकारायांमुख्यार्थबाधप्रतिसंधानात्सदृशपदेनविसदृशंल
क्ष्यते तत्रमत्प्रियरमणेनशत्रुतावरणारूपं एवंचमत्कृतइत्यस्यलक्ष
णायास्वकृतेइतिह्नासिइत्यस्यचद्वयोरपीत्यर्थः अथवामत्कृतेत्वरणमपि

नहूनासीत्यर्थः तेनचनायकः सापराधइतिदोषमूलं नायिका याज्ञानं
सामाजिकान्प्रतिव्यज्यतइति ६ उअणिच्चलेति उअइत्यस्यार्थं पश्यपत्या
र्थे पश्य निश्चलनिष्पंदा बिसिनीपत्रेराजतेबलाका निर्मलमरकत
भाजनपरिस्थिताशंखशुक्तिरिवेति संस्कृतं का विदुपनायकं प्रतिवदा
ति बिसिनीकमलिनी तस्याःपत्रे बलाकाःप्रसिद्धःपक्षिविशेषः रा
जतेशोभते त्वंपश्येतिवाक्यार्थस्यकर्मत्वेनान्वयः समीहितसूचनाय
विशिनष्टि निश्चलेत्यादि निश्चलाचासौनिष्पंदेतिकर्मधारयः चल
नंशरीरक्रियास्थानान्तरप्रापिका स्पंदस्त्ववयवक्रिया तदभाविका
सति किंचिच्चलनइतियावत्तुसारात् यद्वा निश्चलज्ञानशंकायानि
रूपयोगेतिकामुकसंबोधनमितिदीपिकाकारः अत्रद्वितीयकल्पेसंके
तस्थानरूपकांगत्वस्यवाच्यसिद्धांगत्वतापत्तिः एतत्संकेतस्थानेत्वयाना
नुसंहितमयैवोन्नीतमितिज्ञानेनैवनिरुपमत्वसिद्धिरितिकेचित् नि
श्चलत्वंस्वप्रयत्नाधीनक्रियाशून्यत्वं निष्पंदत्वंस्वाधीनक्रियाशून्यत्व

मित्यपौनरुक्त्यम् एवंचवातादिसंचारस्फुरणत्वमपिमन्तव्यमतइत्याहुः निश्चलोऽ
चलः पर्वतःतद्वन्निष्पंदेत्यर्थः अथवानिश्चलापृथिवीवनिष्पंदेत्यर्थइत्य
स्मे तदयुक्तम् उभयत्राचलपदस्यपरिच्छित्तिसद्भावात् पृथ्वीवाचकत्वेनाभि
मतस्यनिश्चलपदस्यस्त्रीलिंगनियतत्वेनभाषितपुंस्कत्वाभावात्पुंवद्भावा
नुपपत्तेर्निश्चलेतिह्रस्वानुपपत्तेश्चेति निर्मलेत्यादि निर्मलेस्वच्छेमरक
तस्यनीलमणेर्भाजनेपात्रेपतितस्थिताशंखशुक्तिः शंखवदतिशुक्लिसदृशंचंद
नादिनिधानपात्रंनतुमुक्ताशुक्तिः तस्याबलाकावर्णसदृशवर्णत्वाभावात्
शंखशुक्तिपदस्यतत्रासामर्थ्याच्च एवंचानेनतोपमयात्यंतिकत्वाभावःसू
चितेपर्यंतिकचमत्कारस्यानंतसंभोगविप्रलंभभेदेनव्यंग्यद्वयंप्रकाशित
क्तं केचित्तुनायिकाविरहवेदनांकामुकंप्रतिमूढंनिवेदयंत्यासख्याइयमु
क्तिः रेनिश्चलसुरलसनिसंदानिश्चेष्टानुनातिशयात्तत्वेनाध्यवसितासखी
विसिनीपत्रेतापाछायितारजतत्वमेवागमपश्येति शंखशुक्तिरिवेत्यनेन
निश्चेष्टत्वातिशयस्तेनचविप्रलंभातिशयोव्यंग्यइत्याहुः ७ मुखविकसिते

का० प्र०
उ० चं०
१२

णि

ति इन्दुवदनायास्तनौशरीरेनकणिम्नः उद्गमः आविर्भावो मोदते स्वकार्यंज
ननेअनियंत्रितो स्त्रीत्वर्थः अकृतैव यमिंदुवदनां तत्रापि एवंविधं यौवनवि
जृंभमाणामिति कष्टमापतितं विदग्धयुवजनस्येत्येवं विरोधवतैस्तेन प्रतिपा
द्यते अहो रमणीयत्वातिशय इति विस्मयो वा भाग्येन परमोत्सवस्थान
मुपपन्नं युवजननयनानामिति हर्षो वा वतामेत्राणसंतोषवेदानुक्रो
शाविस्मय इति नानार्थकोशात् कथं विदितमित्यपेक्षायामाह स्मावमिति
यतो मुखं विकसितं प्रस्तुतं स्मितं ईषद्विकाशितं यत्तेस्मितं स्मास्यंदिताधर
मितमुकुलत्वाणाहास्यविशेषरूपं यत्र तथाभूतं एवं प्रेत्ताणांभावेकृः वशि
तो वशीकृतः स्वायत्तीकृतः संबंध इति यावत् वंक्रिमा वक्रत्वं येन तथाभूतं
तृष्यागतिर्गमनं समुच्छलिताः धारारूपेणाप्रादुर्भूता विभ्रमा विलासा य
स्यां तथाभूतां मतिर्बुद्धिः अपास्ता त्यक्ता संस्था परिमितविशयस्थत्वं यया
अनेकविषयसंचारिणीति यावत् उरः वक्षस्थलं मुकलितो मुकुला
कारौ उद्भिन्नौ वा स्तनौ यत्र तथाविधं एवं जघनं अंसस्य बंधो विभक्तता संपा

राम
१२

म५२

दनं तेनोद्भूतं उत्कृष्टमिति यावत् तथा च साधारणस्मिताद्युन्मेषः स्फुटमेव
यौवने मोदं व्यामयतीति भावः अत्र विकासस्य पुष्पधर्मस्य स्मिते वशी
करणस्य चेतनधर्मस्य वक्रिमणि समुच्छलनस्य मूर्तधर्मस्य विभ्रमे ।
संध्यायां मर्यादायास्त्यागस्य चेतनधर्मस्य मतौ मुकुलितत्वस्य पुष्पधर्म
स्य स्तनयो उद्भुरत्वस्योन्मुखत्वस्य चेतनधर्मस्य जघने मोदस्य हर्षस्याचेत
ने यौवनोद्गमे बाधितत्वात् हि कासितादिपदैः स्ववाच्यसंबंधाश्रयणेनोप
दर्शितपदार्थलक्षणे तत्र विकासस्य पुष्पप्रसृतत्वस्य प्रसृतत्वमात्रेण
सामान्यविशेषभावः संबंधः मनोहारित्वव्यंग्यः समुच्छलनस्य प्रादुर्भूतत्व
सर्वस्वशालित्वस्य संबंधत्वेन सामानाधिकरण्यसंबंधः पूर्वं सौगंध्यात्सर्व
त्र कर्कशतापेक्षितस्यासीदिदानीं त्वभिमत एवेति पुष्कान्तरागित्वं व्यंग्यम् ।
समुच्छलनस्य प्रादुर्भूतत्वेन सामानाधिकरण्यसंबंधः सकलवशीका
रित्वं व्यंग्यं तथा मर्यादात्यागस्यापि द्वयपरिमितविषयत्वे नैकाधिकर
ण्यसंबंधः अनुरागातिशयो व्यंग्यः तस्य तादृशामिति प्रयोजनत्वात् मु

का० दी०
उ० वं०
१२
13

कुलितत्वस्य पुष्पसंस्थानस्य तादृशसंस्थामात्रेण सामान्यविशेषभावः सं
बंधः उद्भिन्नत्वेन तत्र सामानाधिकरण्यं आलिंगनयोग्यत्वं व्यंग्यं एवमु
न्मुखत्वरूपस्योद्गतत्वस्योत्कण्ठत्वेन कार्यकारणभावः संबंधः उत्कर्षस्यो
न्मुखत्वे हेतुत्वात् रमणीयत्वं व्यंग्यं एमोदस्यानियंत्रितत्वेन समं हेतुहेतु
मद्भावः संबंधः मोदस्यानियंत्रितत्वे हेतुत्वात् स्पृहणीयत्वं च व्यंग्यं इति
एतानि काव्यभावनापरिपक्वबुद्धेः सहृदयस्यैव प्रकाशंते दीपिकाकारास्तु
विकासेनासंकुचितत्वसंबंधेन सातिशयत्वं लक्ष्यते सौरभादि व्यंग्यं वा
शीकरणेन स्वाधीनत्वं लक्ष्यते अभिमतविषयप्रवृत्तिः संबंध समुच्छल
नेन बाहुल्यं लक्ष्यते प्रयोज्यप्रयोजकभावः संबंधः बहुलं हि समुच्छ
लति संख्यायां मतेराधिक्यं लक्ष्यते हेतुहेतुमद्भावः संबंधः पूर्वमु
ग्धतया गुरुजनसन्निधौ प्रियतमे ष्वंगीकृतमर्यादा मतिरासीत् इदानीं
तमोगुण्यसागाद्भुतत्वेनानुरागातिशयो व्यंग्यः मुकुलितत्वेन काठिन्यं
लक्ष्यते निविडावयवत्वं संबंधः कठिनं हि तद्भवतीत्याहुः ८

राम
१३

ता॰

स्त्रीपरिचयादिति जडाश्चानभिज्ञाश्चापिजनाः श्रियालक्ष्म्याः परिचयात्संबंधा
त्विदग्धानांचतुराणांयानिचरितानिचेष्टितानितेषामभिज्ञाज्ञातारोभवंती
त्यन्वयः अत्रदृष्टांतमाह उपदिशतीत्यादि यथायौवनस्यमदोहर्षभरइति
यावत् सएवकामिनीनांस्त्रीणांललितानि सुकुमारतयांगानांविन्यासो
ललितंभवेदित्युक्तलक्षणम् ललितप्रभृतीन्विलासविब्बोकादीन्हा-
वान्बहुवचनस्याद्यर्थत्वात् संचरणदर्शनवचनहसितादिगतिभंगवि
शेषादीनितिकेचित् यत्तुललितानिविभ्रमानीतिव्याख्यातंतत्रविभ्रमो
ललिततथेत्यमरइतिप्रमाणोपन्यसनंतच्चेति विलसितंस्त्रीणांविलास
विब्बोकविभ्रमाललितंतथा हेलालीलेत्यमीहावाःक्रियाःशृंगारभावजाः
इतिकोशवाक्यस्यविलासादिषुहावपदशक्तिप्रतिपादनार्थत्वादिति उप
दिशति अज्ञातानिज्ञापयति अत्रशब्दकरणकाज्ञातज्ञापनस्योपदेश
पदार्थस्यवक्तृधर्मत्वेनयौवनमदेबाधात् सामान्यविशेषभावसंबंधेन
तज्ज्ञापनमात्रंलक्ष्यते ललितज्ञानेअनायासोव्यंग्यः प्रयोजनंसहृदय।

का० टी०
उ० चं०
२४
15

यादृशाहृदयवेद्यम् उपदेशादनायासेन ज्ञानमित्यस्य प्रसिद्धत्वात् यत्तज्ज्ञा-
नेननिरपेक्षत्वंअंगत्वमिति तत्र नस्यमदप्रवेशेनेवकारवाच्यत्वात् इति मदो-
रेतसिकसूर्यांगवैदर्भेभदानयोरिति विश्वः ९ एहहमत्तेति सौदर्याति-
शयशालिन्यानयनगोचरतामायागणाश्रवणमात्रजनितानुरागेणना-
यकेनावस्थायांदृष्टायांहृत्वा याद्दयमुक्तिः एतावन्मात्रस्तनिका एताव-
न्मात्राभ्यामक्षिपत्राभ्यां एतावन्मात्रावस्थाएतावन्मात्रैर्दिवसैरिति संस्कृतं
परिमाणेदघ्नप्रत्ययः एतावत्परिमाणेग्रामलकादिपरिमाणेस्तनौ य-
स्यासातथाभूता एवमेतावत्परिमाणेययेस्ते एतावन्मात्रेविवर्तितकमल
दलादिपरिमाणेताभ्यामक्षिपत्राभ्यां नयनदलाभ्यामुपलक्षितेत्यर्थः उप-
लक्षणे तृतीयानुशासनात् तथा एतावद्भिवर्तितपरिमाणंदीर्घोदियस्यासात-
थाभूता अवस्थास्वरूपंयस्यासातथाभूता एवमेतावद्बुद्धिस्थंपरिमा-
णंसंख्यायेषांतथाविधैर्दिवसैर्लक्षणायासंवत्सरैरुपलक्षितापरिच्छि-
न्नेतियावत् वर्षकथनस्यैवप्रायशोलोकव्यवहारसिद्धत्वात् दिवसे

राम
२४

रितिवारणीवारतीया अत्र मत्कृत्वाकारहस्ताभिनयेन स्तनपरिमाणावि-
शेषप्रदर्शनाकृतितेन नेत्रपरिमाणविशेषे उत्तानाङ्गुष्ठप्रदर्शकेन तद्वि-
शेषे अंगुल्येकधारणादिरूपेण च दिवससंख्याविशेषे बुद्धिस्थमात्रशक्या-
पलापवत्शब्दानियमितशक्त्यः यत्प्रेषितं शनितत्कृत्वा ज्ञावस्थाकथन-
मिदमिति तन्नातिसमीचीनं दिवससंख्याकथनासामंजस्यादिति १०
महात्मन इति यस्य प्रकृतिराजः करो हस्तः सततं निरन्तरं दानस्य वितरणस्य
संबंधियदंबु तस्य सेकेन सुभगः शोभनो भूदित्यन्वयः कीदृशस्य यस्य भद्रं
शोभनं आत्मास्वरूपं अन्तःकरणं वा यस्य तथाभूतस्य तथाडुरधिरोढा अना-
धृष्यातनुशरीरं यस्य तथाभूतस्य एवं विशाले महति वंशे कुले उन्नतिर्मह-
त्वं यस्य तथाविधः विशालवंशसोन्नतिर्यस्मादितिवा तथाकृतः शिलीमु-
खानां बाणानां संग्रहः समीचीनो ग्रहो भ्यासदार्ढ्येन तस्य तथा अनुपप्लु-
ता अवाधिता गतिर्ज्ञानं यस्य तथाभूतस्य गतिर्ज्ञानं यद्वा अनुपप्लुतानां
निडष्णानां गतिर्हितकर्तेति दीपिकायां परान् शत्रून् वारयतीति परवार

णः तस्य तथाभूतस्येति राजपक्षे गजपक्षे च यस्य परिवारणस्य अष्टकरि विशे
षस्य करः शुंडादंडः दानांबु मदजलं भद्रात्मनो भद्रजातीयस्य भद्रो मंद्रो मृग
श्चैवं संकीर्णतेषां गजयोनवइत्युक्तेः दुरधिरोहतनोः दुःखेनाधिरोह्य शरी
रं यस्या सा तथा विधा तनुर्यस्य तथाभूतस्य अस्य वृत्तात् विशालवंशाव
तउन्नतिः उन्नतवंशस्य यद्वा विशालवंशस्य पृष्ठदंडस्योन्नतिर्यस्य शि॰
लीमुखाः भ्रमराः संचरन्त्याकर्षणं अनपस्रुतगतेः अनद्रुतगमनस्य धी
रगमनस्येत्यर्थः अत्र प्रकरणाद्राजवृत्तांतो वाच्यो गजवृत्तांतस्तु व्यंग्य इ।
ति इति श्रीमद्वैद्यनाथकृतायामुदाहरणचंद्रिकायां द्वितीयउल्लासः २
एकाकिन्या नदीं गतायाश्च यस्याकूतोयमीदृशः अमइति वितर्कयंतीस
मानलीलां प्रवेशिनीं प्रतिकाचिदाह अइ पिहुलमिति अतिपृथुलं
जलकुंभं गृहीत्वा समागतासि सखि त्वरितं श्रमस्वेदसलिलनिःश्वासनिः
सहा विश्रामामि क्षणांसं विउलमिति पाठे विपुलमित्यर्थः सार्तीसप्रता
यताध्वननं अतिशयेनपृथुलं महांतं जलपूर्णकुंभं तेन दुर्वहत्वं गृही

का० टी०
उ० चं०
२५
15

राम
१७

मघे॰९

वासमागतास्मिन्नतु विश्रामः तरितमित्यनेन स्वेदातिशययोग्यताध्वन्यते श्रमात्
यो सलिलस्वेदनिःश्वासौ ताभ्यां निःसहा निर्बला चलितमत्तमेति यावत् सलि
लेनोक्त्वा स्वेदस्य बाहुल्यं व्यज्यते अन्तः त्वयां विश्रामामि विश्रामं करोमि त्वयाचै
वंविधं कृं भवद्गमनजन्यो यं श्रमो नान्यथा शंकिष्याद् इति रतगोपनं गम्यते श्रोत्रिद्वे इति ।
कृतककामुककोपभोगात् तों अतिद्वयमुक्तिः श्रोत्रिद्वं दौर्बल्यं चिन्ताग्लानत्वं सन्निश्व
सितं ममसंदभागिन्याः कृतेन सा खिन्नतां वापि परिभवति सं मद्धकेनं मदीयमिति वा
तद्दे इति कर्मणि षष्ठी परिभवतीत्यस्या हिंसार्थत्वादिन्यायः तद्देति हितीयांतमेव
तथानुशासनादिति दीपिकाकारः तदा च संस्कृतच्छायापि तावमित्येवं बोध्या तद्द
वीतनं तरेन्यरद्दे इति केचित्पाठः सनयुक्तः चनद्दानिदोषादिति केचित्तन्न गाथाभं
गेपिच्छंदोंतरानभंगादिति चंडीदासः हे सखि सनिःश्वसितं श्रोत्रिद्वांद्रिकं कर्तृमंदभा
गिन्यामत्कृते मदर्थं त्वामपि परिभवति पीडयतीत्यन्वयः निःश्वसितं निःश्वासस्तस
हितं उन्निद्रस्यगतनिद्रस्य भावश्रोत्रिद्रं मंदः अल्पभाग्यो भागधेयं विद्यते अस्याः
सा तया मां तावत्परिभवत्येव मत्कार्यार्थं गमनागमनादिना कामुकप्रसादन

का० टी०
३० पं०
१९
16

व्यापारेणत्वामपीत्यपिशब्दार्थः मदीयमिमर्थेनमदीयमोविद्यादिकं वा
मपिस्वैरवशात्परिभवतीत्यर्थः अतएवमस्वीतिसंबोधनेपतेनस्वीयसैन्यविद्या
देरन्यपरिभावकत्वासंभवात्स्वीयसजातीयत्वलक्षणेतिनिरस्तं एकेनोभयप
रिभवाभावादप्यर्थसमुच्चयानुपपत्तेश्च अचकोइअवैशिष्ट्येनकामुकोपभोग
व्यक्तिः भागोरूपांशकेप्रोक्ता भागधेयैकदेशयोरितिविश्वः ॥२३॥ तथाभूतमि
ति वेत्तीसंवरणोद्यर्थकदाचित्त्वियतेगरुरितिसहदेवोक्तानंतरंगुरुः किंवे
दमपिजानातीत्युपक्रम्य भैमीमसेनोक्तिरियं अथेदत्यमित्याशाह्यत्रगुरुगौरवेण
सात्ताद्दनभियोग्योयुधिष्ठिरः इत्यमन्तनाप्रकारेणाविन्नेस्तानेमयिविद्यतेनेन
तिविरोमात्सर्यैभजतिकृरूपकैरवेष्वथापिएवंइरवश्यायामपिनभजतीति
सोपहासकाकाक्वार्थः किंकृतेत्याह तथाभूतमितिनपरैरेवसदः सभातः
स्यापांचालाधिपस्यराजस्तनयांपुत्रींजन्मप्रभृत्यपरिभूतां अस्मत्परिग्रहेणावत
याभूतांस्त्रीधर्मिणींदुःशासनाकृष्टकेशपाशांविशिष्यभवत्सत्रिधावपिकथ
यितमयोग्यांदृष्ट्वापिभजनक्रियया समानकर्तृके उषितंस्थितामितिचभावे

राम
१९

कथमयमिदं द्वितीयांतं दृष्टेत्यस्य कर्म । तथाच वल्कलधरैरस्माभिर्वने याधैः
सार्धं ननु वानप्रस्थानुपादि मियदूषितं विराटस्य राज्ञः यागासे गृहे यत्नचित
स्य शूद्रादिविशेषस्य प्रारंभेणानिम्नंतं गूढं यथा स्यात्तथा स्थितं च दृष्टेत्यर्थः
दीपिकाकृतस्तु दृष्टेत्येतदूषितमित्यनेन समानकर्तृकं संनिधानात् ते
न पंचानामपि तद्दर्शनं लभ्यत इत्याहुः अमीभिश्च वल्कलधरैर्व्याधैः सदोषितं
मां दृष्ट्वा विराटस्य गेहे स्थितं च मां दृष्टेत्यर्थमाहुः अत्र काकुवैशिष्ट्यात्मास्त
र्येस्यास्तं तानौचित्यं ध्वन्यते २४ तदुक्तमाह इति तदा मम गंडस्थलनिमग्नां दृष्टिं
न नयस्यन्यत्र इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिरिति संस्कृतं नायिका
भयेन निकटवर्तिनीमन्यां मातृतादपहाय नायकाकपोलगतेनत्यंति वि
बं नायिकामुखावलोकनमिषेणापश्यतं नायकं प्रति प्रतिबिंबापगमे दृ
ष्टिविकारेणाज्ञातरहस्या या नायिका याइयमुक्तिः तदा यदा सा कामिनी
मत्संनिधावासीत् निमग्नां अनिमिषितयानया भूतामिव णमित्यमि
तिपाठेन मिलितानि हिता मित्यर्थः सैवाहं तदवस्थैवेत्यर्थः सान्निध्यानि
मिषा तया सखी सान्निध्यातिरिक्तः सकलस्तवेनादृशादृष्टिविरहस्तदेदा

का० टी०
उ० चं०
१७
17

नेपदात्मकवाक्यगम्यः सर्वोमानिषिध्याभावस्यप्रयोजकमवगमयतीति
वाक्यवैशिष्ट्यादादौरिङ्क्ष्मसकलस्यतेषां १५ उद्देशोयमिति नायिकांप्रति
रमणार्थिनः कामुकस्योक्तिरियंतृप्याशा देशनिर्विकंदर्पवेदनयातनुतायो
गिनिश्चयंनर्मदायाः नर्मददातीतिनर्मदानतुकथंचिद्दीनस्याउद्देशःऊ
र्ध्वोदेशः स्खलनभयेनसंचरतामनवलोकनीयस्त्रिष्टतीत्यन्वयः उद्दिश्य
तेदूरादेवजनैर्नेषुनर्गम्यतइतिनिर्जनत्वंसूच्यतेइतिदीपिकायां कीदृश
स्तत्राह सरसेत्यादि सरसानांस्निग्धानांकदलीनांश्रेणिपंक्तयायाशोभा
तयाअतिशायीअतिशायितः अत्रसरसत्वेमुख्यकपाणिध्वनिरादिश्रेणी
त्वेनचवेष्टनंगम्यते तथाकुञ्जानामुत्कर्षेणागजन्ममधुकरकरंवितकु
सुमसमृद्ध्यादिरूपेणाकारितः अभूतप्रादुर्भूतः रमणीनांविभ्रमोवि
लासोयत्रसः तथावात्स्यत्रविलासानामपिनुवनवोन्मेषशालिवि
लासोरयातभवत्याः कामवैमुख्येदुरुत्तरव्यसनस्यादितिभावः नकेव
लमेतावदेववैमुख्यबाधकंकिंतन्यदपिवलवदस्तीत्याहकिंचेति एत
स्मिन्प्रदेशेनेशेनामायमोर्गाध्यवतयाप्रसिद्धावातावांति कीदृशाः सर

राम
१७

तस्यगृहदः श्रमघर्मापनोदनेन निरंतरशय्यानंदमयतद्रूपसुरतोत्कर्षेरितवः ।
श्रमापनयनेनपुनःपुनःप्रवर्तनयासुहृदः इत्यन्ये येषांवातानामग्रेमनोभूः
सरतिचलति मनोभूतेनचेतोवतांदुःपरिहरइतिध्वन्यते ममेज्ञातेतिकेचित्
कालितोधतः अकारोऽनवमरैनिमित्ताभावेइतियावत् कोपोयेनसः स्मरः ।
तवैमुख्येनदर्द्धकूपितः किमिवनकरिष्यतीतिध्वन्यते अत्रवाच्यसंदेशादेरु
क्तविशेषणावैशिष्ट्यात्कामुकाभिप्रायव्यक्तिः २६ कांचित्संकेतार्थिनंतटस्थमे
वसंनिहितमुपपतिंप्रतिसंकेतकालसूचनायप्रतिवेशिनीप्रत्याह गोत्वइति
नदत्याईमनाश्वश्रूर्मीगृहभारेसकलेक्षणमात्रंयदिसंध्यायांभवतिनवाभवति
विश्रामइतिसंस्कृते अणास्समनाइतिपाठेत्वमनाइतिहोऽन्यंतरंणावरेस
धिकपाठेकेवलमितिवोध्यम् नदतिप्रेरयति अनार्द्रमकरुणंतेनश्रमा नो:
दिव्याजालंबनेनापिनावकाशइतिध्वन्यते गृहभारोगृहकार्यनिर्वाहः
सकलइत्यनेनसर्वकालिकीव्यग्रतासूच्यते यदिक्षणमात्रंविश्रामोभवति
तर्हिसंध्यायां अथवानभवतीतियोजना अत्रकामुकमंनिधित्वरूपादन्य

का० प्र०
उ० वै०
१८
१|

संनिधिवैशिष्ट्यात्संकेतकालसूचनाभिव्यक्तिः १७ गच्छेति श्रूयते समागमि
ष्यति नवप्रियो यामप्रहरमात्रेण एवमेव किमिति निःश्वसितं तस्या विसज्जयकर।
णीयमिमिति संस्कृतं उपपतिं गन्तुमिच्छन्तं प्रस्थितां नायिकां निवारयितुं स
ख्यायाः उक्तिः समागमिष्यतीति श्रूयत इत्यन्वयः श्रूयते न तु चिरकाले।
कृतं सम्यक्करणीकाम आगमिष्यति प्रियइति सोत्कण्ठोक्तिः अथ नन्तरदिनो
त्तरो प्रहरमात्रेण विलंबेन एवमेव तदीयभोजनाद्युपयोगिव्यापाररहितेन
करणीयं रंधनादिकं स्वयं साधयेत्यर्थः अत्र विदितरहस्याया सख्या कृतस्य प्रि
यागमनप्रस्तावस्य अभिसरणप्रकरणाकृतत्वरूपाद्वैशिष्ट्यात्प्रस्तावपद
वाच्यस्याप्रकरणस्याभिसारसंबंधित्वरूपाद्वैशिष्ट्यान्निवारणं व्यज्यते १८
अन्यत्रयूयमिति हे सख्य अन्यत्र इतो हरेः कुसुमानामवचायहस्तेनादानं।
हस्तादाने चेरसे पदइति वचो विधानात् तथा चान्यहस्तग्राह्यकुसुमबाहु।
ल्यमिति प्रलोभितम् असौ त्वहमर्थकं अत्रागमवचायं करोमि हे तमाह राम
नाहंहरी इति ह्रियस्मात हरंभ्रमितं संचरितं नमम यो प्रसीदत प्रसन्नाभवत १९

म्

अयंवः पुष्पमंजलिः रचितः कृतः सर्वाभ्यर्थकोंजलिरयं सामर्थ्यादेव अ
वदेशस्य निर्जलत्वादिवैशिष्ट्यात्स्वच्छत्वकामुकप्रेषणमास्य स्तोषयति अन्य
ते १९ गुरुपरवशेति गुरुजनपरवशप्रियकिंभणामितवमंदभागिन्य
हं अद्यप्रवासे व्रजसि व्रजस्वयमेवजानासिकरणीयं त्वदेति द्वितीयांत
पूर्ववत् संबंधसामान्यविवक्षयावाषष्ठी गुरुजनः जनमात्रेनत्वविदग्धः
सएववसंते प्रवासप्रेषणात् परःशत्रुस्तस्यवशाअधीनेति संबोधनविशे
षणं तेनानिर्वीर्यत्वं प्रयत्नेनगमनेऽ:खोत्कंठं किंभणामि वदामि
परायत्तेनिरर्थकत्वात् मंदभागिनीअल्पभाग्यायतस्तवेयंमतिः किंमया
क्षिप्तेनत्याह अद्येत्यादि अद्यप्रकरणाद्वसंते यत्प्रवासिनोपिगृहमायां
ति व्रजस्येतिरोषोक्तिः स्वयमेवकरणीयंकर्तेमहंजानासि तेन स्वधैर्यबुद्ध्ये
वप्रायोगच्छसीत्यभिप्रायः अत्रायशाहप्रतीतात प्रतिदिनोपचीयमानत्वा
दिरूपाद्वसंतकालवैशिष्ट्यादिदानींत्वद्गमनेनजीविष्यामीतिव्यज्यते
२० द्वारोपांतेति मित्रंप्रतिनायकस्योक्तिरियं मयिद्वारस्योपांतेस

मीपे निरंतरे निर्भरे वधूनेपथ्ये तस्मिन्निहिते सतितया प्रकृतया नायिकया सौंद
र्यस्य साराणां श्रीः संपत्तिर्यत्र सौंदर्येण साराणां श्रेष्ठानामिव श्रीः शोभा वा
यत्र तथाभूतया ऊरुयुगं प्रोल्लासप्रसार्यपरस्परेण समासक्तं सवडं समासा
दितं स्थापितं अथवा भावेन प्रत्ययः तथा च समासंगं प्रापितमित्यर्थः तथा
शिरः संबंधि अंशुकं पुरतः मस्तकोपरि आनीतं चले चपले लोचने अथः क्षिप्ते
संचरिते वाचः वचनस्य तत्र नानाविधं प्रसरणं सखीषु प्रवर्तनं निवारितं दो
र्लते भुजलते संकोचिते आकुंचिते मिथः संयोजिते इत्यर्थः अत्र पंचभिर्वाक्या
र्थैः रूल्लासनादि चेष्टावैशिष्ट्यानुक्रमेण स्पृष्टकालिंगन गूढागमनसूयास्त
कोलाहलरागरितपारितोषिकालिंगनानि व्यज्यंते अथ इत्यनेनैव कृते शरी
रमिति कामस्यमिति केचित् तेष्वान्तरका स्मीतिरहस्संघोष्यते तत्र स्पृष्टका
लिंगनस्वरूपं अंससमागतयोः प्रीतिलिंगघोतनार्थमालिंगनचतुष्टयम्।
स्पृष्टकं विद्धकं पीडितकमिलुपक्रमस्संमुखागतायां प्रयोज्यायामन्यापदेशे
न गच्छतो गात्रेण गात्रस्य स्पर्शनं स्पृष्टकमिति वात्स्यायनसूत्रेऽदर्शितम्।

हरस्यैवत्रिपुरस्यहरात्स्त्वांगैः स्वांगानेवमेलयित्वा स्पृष्टकं नामालिंगनमित्यर्थः
२१ अत्तापत्थेति श्वश्रूरत्रनिमज्जतिअत्राहंदिवसकंप्रलोकय मापथिकरात्र्यं
धशय्यायामावयोर्निमंक्ष्यसीतिसंस्कृतं स्वयंदूत्याउपभुक्तिः अन्येतिपाठेऽत्रा।
यंस्माद्धीनविद्यया निमज्जतिवाइत्याविंस्यंदे तेनलवजाअद्रूपा तेनशंकारा।
हित्यं अत्रततोमित्रस्यलेख्यं अहमेवनान्यसहिताअत्रस्वापबोधपरात्रक्या।
निद्रारहितंस्वस्थ्यज्यते दिवसकमितिनिद्रायांकप्रत्ययः तस्यसमागमप्रति
रूलत्वात् द्वितीयाचात्यंतसंयोगे दिवसकंव्याप्येत्यर्थः दिअहपइतिपाठेदिवस
के प्रलोकयसम्यगवलोकयपथिकरात्र्यंधेतिचरहस्यगोपनाय पथिकत्वेन
अमार्हिस्वस्मरणाययाम्यतायारात्र्यंधत्वेनचस्वशय्यापतनप्रसक्तेर्घोतनात् अ
न्यथाप्रसक्तनिषेधेरहस्यभंगापत्तेः मह्रेत्यावयोरित्यर्थेनिपातः स्वमात्रोपादा
नेरहस्यप्रकाशापत्तेः तरुणतयास्वशय्यापतनस्यातंसंतानुचितत्वाद्धास्वमात्रो
ह्टंकनेपिनदोषः निमंक्ष्यसिशयिष्यसेः णिमज्जइइतिणिसज्जिहिसीतिचपाठे।
निषीदतिनिषत्स्यसीतिसंस्कृतं अत्रगृहेविद्यमानायामस्त्रूः अतिवृद्धतया।

का० टी०
उ० वें०
२०
20
का:

वधिरनिरपेक्षत्वादियोगार्थस्य चासत्त्वादित्येतमात्मस्त्रिःशंकंयवदूरेतिक
क्रूपतियायवैशिष्ट्यानुमीयतइतिदिक्‌ २२ इतिश्रीमत्तत्सदुपाख्यश्रीरामभ
ट्टात्मजवैद्यनाथकृतायामुदाहरणचंद्रिकायांद्वितीयउल्लासः २ तालेति
तदाजायंतेगुणायदातेसहृदयैर्गृह्यंते रविकिरणानुगृहीतानिभवंतिकम
लानि इतिसंस्कृतं यदातेप्रसिद्धागुणाः सहृदयैर्गृह्यंतेतदागुणाउत्कर्षहेत
वोजायंतेभवंतीत्यन्वयः दृष्टांतमाह रवीत्यादिअनुगृहीतानिस्पृष्टानिकमला
निसुरभीणिआह्लादकानिभवंति अत्रातद्याभवंतेष्वकमलेनजातसभावोर्थगः
कमलपदलक्षणालभ्यः इदंचकाव्यप्रदीपगतंपद्यं २२ तामस्मीति अस्मी
त्यहमर्थे एवंचयतइत्यध्याहृत्य यतोत्रविदुषामसाधारणज्ञानवत्तासमवायः
एकवाक्यतापन्नःसमुदायस्तिष्ठतीति तस्मादात्मीयोअप्रतायोमतिमाश्याय
अवलंब्यअत्रस्थितिंविधेहि इतिवाक्यार्थेस्मत्तामुपदेशार्हेअहमानतःवच्मि राम
उपदेशामीत्युपदेशक्रियाकर्मत्वेनान्वयः आदायेतिपाठेगृहीत्वाअवलंब्ये २०
तियावत्‌ विद्वत्समवायात्मीयश्रेष्ठानामाश्रुपरंपराभवपरानभिभावेनीयत्वा

प्र:

नहय॰

वाच्यतानिदर्शितत्वात्तानिव्यंग्यानि एवं त्वामहमिति नयोरवक्षेपापदेशपदैत
नालवनीयात्र ते व्यंग्यत्वसंचारणीयत्वमिति केचित्तस्थितिशब्देनापिसा
वधानस्थितिर्लक्ष्या विपत्तिछिद्रप्रेक्षित्वं व्यंग्यमित्याहुः २४ उपकृतमिति
त्वयात्वद्धस्तयत्कृतं तत्र त्वद्विषये किमुच्यते किंवाऽयं बहुत्वाद्वक्तुं न शक्यमि
त्यर्थः भवतापरं केवलं सुजनता प्रथिता प्रकटिता तथा च सौजन्यप्रयु
क्तएतावानुपकारो न तु प्रत्युपकारलाभायेत्युपाधियुक्त इति भावः हे सखे
तयः यस्मात्सुजनता प्रथिता तस्मात् ईदृशमेव सदा विपत्कुर्वन्तु शारदं
वर्षाणां शतं व्याप्य सुखितं सावयुक्ते यथा स्यात्तथा आस्ति एवं ते निसृष्ट्याऽर्थः
सच प्रकरणादिनाबुद्ध्याप्रकारिभावं प्रतिपादितो विपरीतं लक्षयति तथा
या उपकृतं अपकृतं सुजनता दुर्जनता सविशेषो सुखितं दुःखितमिति अ
पकारातिशयो व्यंग्यः एवंविधापकारेऽपि प्रियवादित्वात्साधुत्वं वा तत्रोप
कारापकारविवेको नास्तीति वा तदीयकौटिल्यं व्यंग्यमिति केचित् २५
सेयमिति सेयं प्राणेश्वरी मम मत्तः सकाशात् लोचनगोचरं गोचरं त

का० टी०
उ० चं०
२१
21

नेतिसंबंधः सायदनुध्यानेनसंतानेनैतावानकालोगमितः गोचरमिति
भावप्रधाननिर्देशाद्गोचरत्वमित्यर्थः पूर्वंमनस्येवासीत अधुनाबहिरपि
दृष्टेत्यर्थः कीदृशीअंगेषुनैकत्रांगेमधारसस्यअन्तरसस्यछटाच्छविः
परीरंभेणसर्वांगीणसंतापशान्त्यासौहित्योत्पादनात दृशोरितिसप्तमीद्वि
वचनं शोभनःरूपोद्भवोयस्यतयाभूतस्यकर्पूरस्यशलाकिकाअंजनन
लिका अतिशयितानंददायकत्वात सपूर्वंशोभनेसमरूरमितिदीपिका श
शरीरिणीमूर्तिमतीमनोरथस्यश्रीः संपत्तिः केचित्तु मनः शरीरिणीमनो
निर्मितशरीरेत्याहुः परीरंभस्यचरमत्वेपिप्राधान्यात्प्रागुपादानं २६
इत्थंसंभोगमुक्त्वाविप्रलंभमाह दैवादिति अयाद्दतयाअनमवेकवध
समागमस्त्वयाचपलेत्यायतेदीर्घेनेत्रेयस्यास्तथाभूतया आगमनस
मयेकातरदृष्टिदर्शनात्मरः स्फूर्तिकत्वेनतन्मात्रप्रकर्षोक्तिः विप्रकृष्य अ
भूवमितिशेषः अविरलानिनिविडाविलोलाः सर्वादिक्संचारिणोजल
दायस्यैवंभूतः अयंदृश्यमानप्रकर्षः कालः समयः सएवकालोय

राम
२१

मरुतिस्त्रोयकुतिम्लानभेदाध्यवसानं सम्यक् प्रतिदिनोपचीयमानउणागत
श्चचकाराश्यामल्यकाललतामुच्यते अविरलमिरंतरं च पल्लंकुतं यथास्यात्
यथाजलं ददातीत्सन तयेत्यर्थः इति कश्चित् वियदिति मानवीप्रतिसंख्याह ।
यमुक्तिः देमगेयमानभंगो वश्यंभावी दयितप्राणाभोपेतणाहि वकरदि
ते प्रणतिपरे मन्यः प्रणामशालिनि दयिते ति विशेषसप्तमी प्रमयात्रेणस्वा
मिपात्रेणस्वामिपात्रे प्रसीद न हि पृथ्वं प्रसादं कुर्वित्यन्वयः मानभंगसामग्री
माह वियदित्यादि वियत् आकाशं मलयः अमराइवमलिनाश्चते अंबुग ।
र्भेयेषां तथाभूता मेघायत्रेति कर्मधारयोत्तरं बहुव्रीहिः अस्तीति शेषः सर्व
त्रबोध्यः अंबुगर्भत्वेनाहृष्णास्यैर्यमुच्यते मधुकरकोकिलयोः सहितयोः
कूजितैर्दिशांश्रीः शोभा वर्षासु कोकिलकूजिताभावेपि मूर्धयाभयप्रद
र्शनार्थं सत्याप्रतारणोक्तिरियमिति केचित् मधुकरा एव कोकिला इति रूप
कं तथा च यथा वसंते कोकिलाः कांतिदे वचनपुरोदानीं मधुकरा इति भावः
यद्वा क्वचनकेचनकोकिलाः प्राहृष्यपि माद्यंतीति यथाश्रुतमेव सम्यक् ह ।

का० टी०
उ० वं०
२२

निर्चंडीदासादय; धरणिः भूमिः अभिनवान् जनाग्रंकुरा एवांके उत्संगे टं
काः पाषाणविदारकाः मर्मभेदित्वात् पाषाणप्रायकठिनमानभंजकत्वाद्वा
यस्यां सा नारप्रणी अंकनाद्येष्टंटंक इति वा अभिनवा अंकुरा यत्र एवंविधो कोम
धोयस्य तथाभूतः टंकः पाषाणप्रायकठिनस्थानं यस्यां सेति चक्रवर्तिनः
अभिनवांकुराः अंकस्थिटंकत्वाविध टंकः पाषाणप्रायदेशो यस्यां सेति दीपिका।
यां एवं चोद्धे मधलिर्यकचोदीपनसहत्वात् इति टप्पसंचारस्याभावात्
मानभंगस्यावश्यभाविलं सूचितं टंकः पाषाणदारणाइति कोशात् २८ पा
रिम्हदेति मालतीमाधवे तथा ह्यस्या इत्युपक्रम्य माधवस्य मकरंदं प्रतिमा
लत्यावस्थावर्णनोक्तिरियं अस्या मालत्या अंगपरिम्हृदिता करतल हय
मर्दनेन शिथिलीकृतायाः मृणाललीवाललम्बनालंकृत म्लानेत्यंगमित्य।
भिप्रायमेकवचनं तथा क्रियासु शरीरधारणमात्रोपयोगिनीषु वह्नीषु
पन्यस्तासु परिवारस्य सा तौ सा पं यस्य प्रार्थनाभिरनेकाभिः कथमपि अनिच्छे
मात्रपि बलात्कारेण प्रवृत्तिः सकलं त्वाचिदुपक्रम मात्रेत्यस्या इत्यनूपज्यते

राम
२२

एवमग्रेपि चकारोप्यर्थे कपोलेपि निःकलंकस्य कलामात्रावशिष्टस्य हि
मांशोरिवस्य लक्ष्मीं शोभां कलयति धारयति पांडुत्वाम[illegible]त्वात् शोभामि
त्यनेनैवमपि न शोभाद्युतिरिति रिति निरस्यते कपोल इत्येकवचनादेक एव।
पांडुः सौकुमार्येणाग्रसर्वतः पांडिमानुदयात् अपरस्तु अभिनवस्य करिणो
यो दंतच्छेदः छि[illegible]र निच्छेदः कमनीयवस्तु छि[illegible]ओ भागस्तद्वत् कांतः अंकक
मिश्रइयवर्णः नूतनकरिदंतस्य कोमलत्वेनाग्रुरक्तसंबंधेन तल्लाभादिति
चक्रवर्तिनः जात्यभिप्रायमेकवचनं इत्यन्ये केचित् अभिनवो यः करिदं
तच्छेद इत्यन्वयस्तेन शोभाधिक्यात् पांडुताधिक्येन विप्रलंभोत्कर्षः तथा
च कालिदासः सद्यः कृत्तद्विरददशनच्छेदगौर[illegible]स्य तस्येत्युत्तरकर्तनेन सद्य इत्यस्त
मारेमारः २५ दूराहिति जातं प्रागेव राधोयस्मात् मारतस्तथाभूतेन।
त्वहं नागसि अत एव प्रथमि प्रतिपादे मानिन्या उक्तिः अरे इत्यस्य पंच
पंचविविचित्रव्यापारसंतानेचतुरजातमित्यन्वयः प्रपंच चात्र यमेव प्रपं
चयति दूरादित्यादि दूरा हूय इति शेषः सप्तम्यर्थे पंचमी दूरस्य इत्यर्थ इति

मर्षं इति महेशः सर्वेषु मन्मथेषु प्रेयसीति संबध्यते उत्सुके इतोऽन्यच्च।
वार्यतीति शंकया उत्कंठा सचकोविशेषणालि आगते समीपं प्राप्ते विवलिते
दूरतः पश्यंत्या मे औत्सुक्यमनेन ज्ञातमिति लज्जया तिर्यक्कृते संभाषितास्फा।
रिते विकसिते स्मितालापेणाद्दर्पोदयात् संप्रेक्षते सम्यगतिशयेन साचिध्यग
प्रवर्तिग्रहणांग्ररक्ते प्रसमाधेवसर्वशंमिर्व नीतिकोधात् अतएवापसरंत्यागद्दी
नवसने किं चेतिस्मत्त्रपेक्षं वितन्वल्लतं प्रचिताकुरि लीकृतान्मलतायेन तथा भ्र
ते कोपाधिकेर्नस्पृयोदयात् किं विदिलसितं किं चेतीति केचित् चरणायोराननतिः प्रणा
मस्तसमवतिकरः संबोधोयस्येति दर्शितविशेषणं अतिकरः समस्त इति केचित्।
बाष्पांबुना अश्रुजलेन पूर्णमीक्षणं यस्य तथाभूते मानभंगेन प्रसादोदयात् अंबुपदं
बाहुल्यसूचनाय ईक्षणपदं गोलकाधिष्ठात्रतेजःपरं गोलकस्याश्रुपूर्णतयैव तन
यनेलोपचारः चक्षुर्ज्ञानमित्यत्र चक्षुःपदं गोलकपरं अतोभेदान्नबहुव्रीहिसंग
तिः महेशस्त्वईक्षणपदं गोलकपरं चक्षुःपरमित्याह तदप्युक्तम् औत्सुक्याविव
लितनविस्फारणादीनां तेजस्यसंभवात् बाष्पांबुनासंपूर्णेसमासे ईक्षणेय।

का० टी०
३० पं०
२३

23

न॰

राम
२३

न॰

येत्वंशैवयमालोचयामः वाच्यावृत्तोत्तरणादिति पाठस्तत्रकाविकल्पः समेजस
एवेति मन्यामिति नवोढायाश्चिनवसमागमवर्णनमिदं अत्रलज्जतइति
लज्जेतिसुष्यकपदं मन्दवर्थीयाच्छ्रत्ययान्तेनलज्जुनेककर्तृत्वेनालोकयति क४
क्त्वाप्रत्ययोपपत्तिः तथाचश्लोकं निर्जनंवासगृहंशयनागारंविलोक्यसखी
निस्सरणसत्वशंकयाविशेषेणादृष्ट्वाशयनात् किंचित् नतुसर्वतः निद्राभंगेया
संपरिवर्तनेनसमाधानंशनैर्बलयादिक्कणशंकयामंदंउत्थायअनुरागजि
ज्ञासयानिद्राव्याजंमिषंउपागतस्यप्राणेशस्य नतुव्याजेननिद्रांसर्वथातदसंभ
वात् पत्युः नवप्रियस्यअपूर्वसमागमेनानुद्विग्नरहस्यत्वात् तथानिर्वर्णने
पिनिद्राजव्याजस्यहिरस्यनाविलम्बे सर्वंसुचिरंयावद्बुद्धिवैभवंनिर्वर्ण्यअनुरा
गातिशयात् निद्रानिर्णयार्थंचनिःशेषंवर्णयित्वासुचिरंव्याजमुपागतस्ये
तिवान्वयः विस्रब्धंविश्वासयुक्तंयथास्यात्तथा निद्रायास्तात्विकत्वभ्रमात्
परिचुंब्य परितःकपोलयोर्भालेनयनयोश्चचुंबयित्वा गंडस्थलींजातपु
लिकामालोक्यलज्जालज्जवतीअतएवनम्रमुखीबालानवोढत्वेनाप्रौढा

का० टी०
उ० चं०
२४
२५

नवसंवैरहस्यमवगतमिति रहस्तता अनवोद्भिन्नस्यत्वादयथवाकालात्तेपक
लाधिक्येणविरंलज्जापगमपर्यंतं भवितेत्यन्वयः सहृदिकमूलधनग्रहणा
यचिरमिति चक्रवर्तिनः अन्यत्रत्वन्यमित्यनेनोद्दीपनातिशयश्चुंबनयोग्य
ताध्वन्यते वासगृहमिति स्वकचुंदनादिसंपत्तिः पत्युरिति प्रकृताच्चरागित्व
विश्रब्धमित्यनेनचरागातिशयादविमर्श्यकारित्वंध्वन्यते नेत्यमुक्तेनतना
मितेनलज्जयातथाविहूलत्वं यथामुखनमनेपाशक्तिरितिव्यज्यते चंडीरा
मस्य नमितंनभनकारितार्थः एवंचनामनेस्मानकत्वात्तत्का अन्ययो
पपत्तिरित्याहलज्जायाअनुभावगम्यत्वेपिशृंगारांगत्वाभावलज्जापदो
पादानं तेनव्यंग्यत्वकृतप्रकर्षापहारात् अन्यथाव्यंग्यत्वप्रयुक्ताभावध्वनि
नापत्तेरिति अत्रयद्यपिपरस्परालंबनेनउभयोरपिरतौप्रतीयेत अन्यग्र
हृष्टापनमुभयोरुद्दीपनं बालायारसोद्दीपनंनायकनिष्ठा अनुभावोन्न
त्वनिर्वर्णनंचुंबनेलज्जाव्यभिचारिभावः नायकरतेरुद्दीपनंनायिकाया
श्चुंबनं हासादिरनुभावः हासकंपोहर्षः संचारीतथापिनायकविष

र्टक
सम
२४

शिष्यानायिकानिष्ठायारतेरुद्रेकस्यवर्णनाविषयइतिचिंतनीयं भोगावा-
सोवासगृहमितिहारावली २२ नायिकारब्धसंभोगमुदाहरत्यनायकाब्धमुदा
हरति नमिति यत्रपूर्वरक्ताभावेन्नारीपुमान्पश्चात्तदिंगितैरितिक्रमदर्श
नायोदाहरणमिति तन्न एवोदाहरणेनैवतादृशक्रमावगतिसिद्धेः त
त्रनायिकोत्कंठायाएवप्रथमंवर्णनात्प्रकृतानुयोगाच्च नचवैपरीत्येरसा-
भासत्वद्योतनायतयाक्रमदर्शनमितिवाच्यम् राकेत्युदाहरणेस्वयमेवरसा-
मानशीलां नाडीनेरणिनि: लक्ष्मींशोभांधत्सेधारयसिग्रत्तोवसकलमनो
हरणात् नकेवलंकंचुकयाशोभानुत्पत्तिरपितुविद्यमानायासिरोधानम
पीत्येवकारार्थइत्यभिधायिनिवारिनिभाषमाणेएवतस्याःकंचुलिकायाः या
वीटिकाग्रंथिर्मोचनायतत्संस्पृशसितिसख्यालज्जयाशय्यायाउत्थाते समीपेनि
विष्टानिविडसंलग्ना भवतीघुस्थितास्वपिग्रयमेवंविचेष्टतइतिलज्जयास्मि-
तसहितासखीआलीजनस्यनायिकेवतस्यानेत्रयोरुत्सवउत्फुल्लतासैववा
नायिकप्रियतमत्वेनआलीजनस्यनेत्रोत्सवः तंदृष्ट्वाहर्षोदयात् तेना

का० टी०
उ० वं०
२५
२५

नेदितः संजातानंदः आलीजनः सखीजनः अलीकानांमिथ्याभूतानांस्मको
मयाभोजनीयः सारिकापाठनीयेत्यादिवचनानामुपन्यासोयथास्यात्तथाश
नकैर्मंदंनिर्यातः निर्गतइत्यन्वयः शनैस्त्वमलीकथावनायिकायालज्जा
तिशयपरिहाराय चक्रिवर्तिनस्तु शनैस्त्वमुत्सवान्माठोढुः त्वोपादानात्
अतएवालीजनोविदग्धः समयाज्ञानादिसाढः प्रियतमइत्यनेनानुपेत्तणी
यत्वं सस्मितेत्यनेनकंचुलिकापसारणोत्तरमश्रुवसजने अत्रमुग्धात्तीप्रिय।
तमश्रुपरस्पररत्यालंबनविभावौ नायकरतेरुद्दीपनंनयनसौंदर्यांगशो
भादि आभाषणवीटिकास्पर्शावनुभावौ तयोरभिधायिनौवीटिकासंस्प
र्शोतितुल्यकालत्वावगमात्प्रतीयमानउत्कंठाख्यः संचारी नायकारते।
स्तुनायकानुभावोद्दीपनंस्मितादिरनुभावः तदंगयोर्हर्षसंचारी प्राधान्येन
त्वास्वादविषयत्वं नायिकालंबनायानायकनिष्ठरतेरितिपूर्वस्माद्भेदः इह
प्रेमोद्भाइति मालत्यर्थेश्मशानसाधनेप्रवृत्तस्यमाधवस्याभिलाशोयं। राम २५
मुग्धदृशोमालत्याः तास्तामदनभूतमविपोषाच्छेदादृग्व्यापारश्चयामयिम

वेपुरित्यन्वयः आशंसायांलिङ् कीदृश्यः प्रेम्नार्द्रेणेनमार्द्राः स्निग्धाः प्रे
मव्यंजकत्वात् प्रेमैवावलोकनादिनापकर्षेनीतंप्रणयः तेस्पर्शंनीतिन्नहि
नस्पृशः प्रेमदृष्टिनादिगतोभावव्यंजकःकश्चनविशेषः तन्मूर्वकोवशीका
रःप्रणयइतिचंडीदासः प्रणयःप्रश्रयः सचगुर्वादिभयत्याज्यवमितिच
क्रवर्तिनः व्यवहारकौशल्यमित्यन्ये वत्सलनेत्यपरे परिचयात् इत्यतिव
शो उच्चाटस्थिरतयानिःशेषमुत्सारितगुर्वादिपारतंत्र्यः रागस्योदयोया
स्तनयाभूताः परिचयातिशयेनरंजनलमः प्रणयपरवागः परिचयो
रहस्यादेशावेदनमितिचंडीदासः निसर्गेणस्वभावेनमधुरामनोहराः या
सआशंसयामनोरथेनकल्पितास्वपि किंपुनरनुभूतासुलक्षणात् अंतःकर
णस्यमनसः आनंदेदेनसांद्रोघनः लयस्तन्मयोभावः वाह्यकरणस्यचक्षु
रादेर्व्यापारंविषयग्राहित्वंरुणद्धीतितयाभूतोभवतीतिवाकार्थः अ
त्रमुग्धदशइतिदक्प्रकर्षोपगमात् प्रेमार्द्राइत्यादिविशेषणस्वारस्या
ञ्चवेशापदेनहग्व्यापाररलाभः २२ अन्यत्रेति इतिउक्तप्रकारेणअ

का० टी०
उ० वं०
२९
26

न्येतराभिः बह्वीभिः कल्पनाभिर्वितर्कैः कवलितं ग्रस्तं व्याप्तमिति यावत्
स्वांतं मनो यस्यास्तथाभूता बाला निशांतस्य गृहस्यांतरे मध्ये निशि निशां
तरे मध्ये निशि निद्रां नालभतेति संबंधः किंभूता सती संजातो विवर्तनस्यापा
र्श्वपरिवर्तनस्य व्यतिकरः समूहो यस्यास्तथा अहन्नविवर्तनं उत्तानपरिवर्त
नं तस्य व्यतिकरः संबंधो यस्या इति चक्रवर्ती कल्पनाप्रकारमाह अन्यचेति
अन्यत्र नापि कांतरगृहे कुजनिगच्छतीति कथापि का नकापि अलीका कि
मुत गमनमित्यपि शङ्कनीयोर्थः खलु निश्चितं अस्य नायकस्य नाहं का
सुहृदपि नास्मि यो मां नेच्छतीहेति तथा च तन्मूलकतन्निवारणमप्यसंभाव्य
मित्यर्थः तर्हि हेत्वभावेनागमनमप्यसंभाव्यं तत्राह नागच्छतीति वस्त्वर्थे
ष्वागतस्तु नेत्यर्थः कारणाभावेपि कार्यमिति विस्मयेनाह हहेति विधेर्दैव
स्य कोपश्चान मृतपूर्वः प्रक्रमः आरंभः अत्र हेतुकार्योत्पादरूपः हहहेति
दैन्ये प्रक्रमः विप्रलंभस्यारंभ इति चक्रवर्ती महमेति ननु दैववशात्त्वाग
तस्तत्राह महसेति सहसा अकस्मात् तथा च विधेर्मया किमद्भुतमिति भा

राम
२९

वर्त्तिसंगमनीयं एषा च प्रागेवं तेन कृतचिन्तापि देवान्न्यायातियत्प्रियः तद्दनागमदुः
खार्त्ता विरहोत्कंठितानामतेनुपलब्धानाम नायिकेत्यवश्यं विरहस्य प्रवासादितः पृथक्
भावः स्वीकार्यः अन्यथा प्रोषितभर्तृकादितो स्याभेदान्तरत्वानापत्तेरिति २४
सापत्त्विरिति काचित्सखीं वृत्तान्तं सखीं प्रति कथयति सा बाला मुग्धापत्तनतत्प्रि
यस्य अपराधकारित्वात् प्रथमापराधस्य अन्योन्यसंगमनासंगमरूपस्य समये प्रथमत्वे
नासत्यत्वं द्वितीयादौ चावश्यं संभवात्तदुक्तिरित्यन्ये सखेन सोढाईनयत्पदेशा
त्तं विनातदभावात् सख्येत्य समसंलभ्नीयांतं तथा च सखीकर्तृकोपदेशं विनेत्य
र्थ इत्यन्ये सविभ्रम मंगस्य स्वेदकम्पादेर्यो वलनाचालनावक्रोक्तयश्चताभिः सूच
नेनैर्थानां नस्य प्रकाशनेनो जानातीत्यन्वयः तर्हि किं करोतीत्यत आह स्वेच्छेत्या
दि अश्रुभिरनुपलक्षणीयत्वस्त्रीया रोदनं चोपलक्ष्यं तथा चाश्रुभिरुपलक्षितं के
वलमेव रोदनं करोतीत्यर्थः लोकोक्त्या गौपचारिकी वातस्तीयेति दीपिका केवल
मेव समुदितो निपात इति चंडीदासः केवलं रोदिति एवैतेभ्याम्यां रोदनायोगरोदना
नयोगयोर्व्यवच्छेदौ लभ्यावितिचक्रवर्ती अयोगस्यात्र विरामः अन्यत् रेतत्वं

का० टी०
उ० चं०
२६
२७

गवत्योदिनो हरिदश्वाश्रुविमोचनमिति यावत् तमारादेवगतार्थस्याश्रुपदस्य विशे
षणादानायोपादानं नतदासवच्छेति निर्मलैः स्वच्छयोर्निर्मलयोः कपोलयोर्मूलं गा
लितैः अंजनपत्ररचनयोस्त्यागाद्दश्रुकपोलयोस्वच्छनेति च क्षवर्ती अश्रुबाहु
ग० ल्येनतयोरषमांसेति टीपिकाकारः उत्तानशायनान्मूलेगलनेलम्बलोलाल
केशितिरूपकं लम्बंतो विप्रकीर्णालोला अंचला ये अलकाः केशाः तद्रूपैसृत्स
त्वात् लम्बल्लोलालकैशितिपाठेलम्बनभ्रमोपन्न लोलालकं स्रोतो ये षां तेरि
न्यर्थः कीदृशी बालापतितिदर्शनेन लज्जया परितः अलोलितिश्नेने त्रोत्सले यया तया
भूता ग्रारुणपाटुत्पलारोपः केचित् अस्रुभिरलकैश्च पर्यस्तेत्यात्रेत्राभेवानेत्रो
त्पलेयस्याः इत्यर्थमाहुः तत्रशद्वसारस्यसंभंगात् पुनरोदोषइति प्रस्थानमिति
प्रोष्यतिका स्वजीवं संबोधयसोबंधवदति हे प्रियप्रीतिपात्रजीवितप्रियतमेयातेग
न्ते निश्चितं संजातनिश्चयं चेतो यस्यतथाभूते सतिनगं नगं नमयतेसर्वे अयीत
वसहृदः सममं सहप्रस्थिताः प्रचलिताः तथा च नवापिगंतधेसतिगमनावश्यंभा
वेसति कृत्यलघुदेशदवज्जलमिति वश्यार्थेनतव्यप्रत्ययः सहृदां सायेः समहृदः कि

राम
२६

गकृतस्यजातत्वयापिगंतव्यमितिभावः कैकैःप्रस्थितमित्यत्राह प्रस्थानमि
त्यादि वलयैःकंकणैःप्रस्थानंकृतं प्रियगमनश्रवणजनितकार्श्येनस्व
स्थानच्युतेः प्रीतिपात्रैर्मित्रैःप्रियसखानायकस्यवामित्रभूतैरितिवचनादि
विपरिणामेन सर्वेषुस्त्रीयांतेषुयोज्यंततंप्रियासन्निधानान्वयव्यतिरेका
नुविधायितया अस्राणामपिहृदयस्थत्वेनप्रियसखत्वमितिचक्रवर्ती अ
स्रैरस्रुभिरजस्रंनिरंतरमसंख्यातत्वात् गतंस्थानान्निर्गतं धृत्याधैर्येणक्षणम
पिनासितंस्थितं चित्तेनगंतुंपुरःपूर्वमेवव्यवसितंउद्युक्तंनतुगतं तेनसमा
सितव्यनेनाविरोधः प्रियेतिसंबोधनेनैवत्वयापित्यक्तुमुचितमितिसूच्यते
प्रियाणांसुहृदांसार्थः प्रियस्यवासुहृदांसार्थइत्यर्थकमेकंपदमितिकेचित्
प्रियसखैरितिविशिष्यात्रविशेषणमत्यंतप्रियत्वप्रतिपादनाय तज्जीवि
तनाशकदुःखोपस्थितादप्यस्रोगमात्किंचिद्दुःखोपशमेनजीवितरक्षकर
त्वात् दुःखातिशयेप्यस्रागमाद्वैसाद्रुः सार्थशब्दस्ययद्यपिसंघसार्थौतुजंतु
भिरित्यमरोक्तेर्जंतुसमूहएवप्रयुज्यमानोदृष्टोनाचेतनसमूहेतथापि

प्रकृते चैतन्यारोपात्संगमनीयः ३९ त्वामिति मेघहूते कुबेरशापप्रति-
बद्धप्रियासविधगमनस्य यदा स्वमेघद्वारा प्रियां प्रति संदेशोक्तिरियं प्रणयेण
कुपितां मानवतीं त्वां धातुरागैर्गैरिकादिरक्तधातुभिः शिलायामालिख्य आ-
त्मानं ते तव चरणयोः पतितं प्रणतं कर्तुं यावदिच्छामि तावन्मुहुरुपचितैः
प्रवृद्धैरस्रैर्बाष्पैर्मे दृष्टिर्दर्शनं आलुप्यते लुप्ता भवतीत्यन्वयः अथांतरेभ्य-
स्तिक्रूर इति अतस्तस्मिन्नपि आलेख्येऽपि नौ आवयोः संगमं क्रूरः श्रेयो-
विघटने जागरूकः कृतांतो दैवमेव कृतांतो यमः न सहते किमुत साक्षात्
इत्यर्थः अत्र कोपे शङ्कि मोदयाद्वातरागैरित्युक्तं भूमिशयनात्तु शिलाया-
मिति एतज्जातीयमेव कवर्णालाभायेति केचित् कठिनचित्तत्वादित्यन्ये
अत्र कथं चित्रलिखितायामाकृतौ पादपतनारंभे तत्कालीनतदीयविलास
विशेषानुस्मरणमुद्दीपितशोकावेशवशप्रवृत्तैरस्रुभिर्दर्शनविघात-
यावत्तादिरंशः शब्दस्तदर्थपरामर्शकः ८२ यमदिति वेणीसंहारे भीमस्यो
क्तिः यस्य भूपतेर्युधिष्ठिरस्य तत्त्वमसिद्धयत् ऊर्जितं उद्भटं यच्च प्रसन्नं तेजः
प्रतापः यः आसीदिति शेषः तदा द्यूतप्रसंगे अद्य तैः पाशकैः दीव्यता क्रीडता
अनेन राज्ञा न्यूनं न्यूनतां प्रापितं तेजः हारितं अर्थाच्छत्रुभिर्गृहीतमित्यर्थः रा
ज्यं हारितमेव तदेव न्यूनतनं तेजोपीत्यपिशब्दार्थः अत्र यच्छब्दानंतरं

नीं तच्छ्रेष्ठोपि प्रसिद्धिपरामर्शकः किं पुनरिदमादिरिति योसावित्यत्रो
क्तदोषो वक्तलेपापिनइति सिद्धं ५२ कल्याणानामिति ॥ मालतीमा
धवे स्तवयारस्य स्तस्य मार्थ्यनमिदम् हे विश्वमूर्ते सर्वात्मकरूप त्वयेवा
त्माजगतस्तस्य स्वप्रदेवेति श्रुतेः त्वं कल्याणरूपाणां तदेवतनामिति याव
त् आपूर्वं तनामिति वक्तावरणोकार्योपचारात् महसां तेजसां भाजनमाश्र
योसि त्रयपवत्सारं मे मनपि धुर्यो न्त्वभारवहनत्तमां लक्ष्मीं भ्रशामतिशये
न देहि त्रर्पय हे देव प्रसीद हे जगत्त्राण नम्रस्य प्रणतस्य मेमम यथ नस्ता
तमज्ञातं च पापं तत्यातिजरहिनाशाय भोमगदूषसे वदूत्तरायमंगलायश्रे
यसे भद्रं प्रकृष्टं भद्रं शोभनं कर्म वितरदेहि भद्रं यथास्यात्तथेति क्रियावि
शेषणं वा त्वमिह महसामीशिषे त्वं विधत्से पुराणां लक्ष्मीम यथमपि हरां देहीति
पाठे तु इह लोके तु कल्याणानामीशिसे कल्याणानि नियमयसीत्यर्थः ग्रथी
गर्थे दयेशां कर्मणीति कर्मणि षष्ठी पुण्यापुण्यफलानि विधत्से करोषि
ददासीति यावत् दशोङ्कपादपिष्टिमित्यर्थो बोध्यः यत्र यमदद्दयेना

ज्ञातत्वाज्ञातत्वाभ्यां रूपाभ्यां पूर्णमस्स्यतकलस्यपापस्यैकेनैवतत्पदेनपापत्वे
नरूपेणापरामर्शोपपत्तेर्नद्वितीयतत्पदापेक्षात एवं ज्ञातमेकरूपेणैवपराम
र्षइतिनियमेमानाभावात् यदीपकृतस्य ययोरितिनपदद्वयं किंत्वनित्या
वोमयोरितिसूत्रेणपदोद्वित्वापत्त्योयमादेशः तथाचादेशिनाएकेनयत्पदे
नतत्पदेनचैकरूपेणैवपापपरामर्शः आदेशस्त्वसावकाशत्वेनान्वये तात्पर्य
ग्राहकइत्येवंचैवतेननतद्वपपत्तोननतच्छेदेपितदपेक्षेत्याहुः रित्यलंविस्तरेण
प ४ किंलोभेनेति॥ रामस्यवनवासेहेतुंचिंतयतो लक्ष्मणस्योक्तिरियम्
सःविनयार्जवादिमत्वेनप्रसिद्धोभरतोलोभेनविलंघितमर्यादःकांतः किंयेनभर
तेनएतद्वनवासादिकंएवंरूपरेनमाचाकरणम् तयामातृद्वारेतियावत् कृ
तंसंपादितमित्यर्थः येनपूर्वलोभरूपेणहेतुनामाचाकरणम् तयाएततदेवंव
रप्रार्थनरूपलेनकृतमितिवा यतोविनयकारित्वेनकोपपात्रामपहृदणं अथवा
मेमध्यमामाताकैकेय्येववस्त्रीणांनिसर्गसिद्धोलघुत्वाद्धृतोगतापाप्नाकिमि
तिवितर्कः एवकारेणभरतव्यवच्छेदः पुनर्वितर्कमाह मिथ्यैतदिति एत

का॰ टी॰
३॰ चं॰
२४
84

न्ममविंताविषयीभूतं द्वितीयमपिभरतस्य लक्षणत्वंमातुः तद्वत्वंच मिथ्या
कृतइत्यतआह आर्येतिइतिशब्दोहेतौ यस्मात्गरुर्भरतः विमर्शेनकोपाप
गमात्स्वात्मत्वेननामाग्रहणंआर्यस्यश्रेष्ठस्यरामस्यानुजइतिहेतोराद्यं मा
तात्नातस्यदशरथस्यकलत्रंभार्येतिहेतोर्द्वितीयंचेत्यर्थः तर्हिकेनैतत्कृत
मत्याह अनुचितमिति विधात्रात्वनुचितंकृतमिमंस्येइतिसंबंधः ५५
श्रितेति ॥ सामोपायलब्धसिद्धीनांराज्ञांवर्णनमिदम् अयतेराज्ञानो।
विग्रहस्ययुद्धस्यतर्पणेनत्यागेनगतमत्सरैः येषांतथाविधाः शेरते
निश्चिंततयानिद्रांकुर्वंतीत्यर्थः कीदृशाः श्रिताश्रितास्तमालातिर्यैस्ते
थाभूताः रक्तानरक्ताभूः लक्षणयातद्गतनिखिलजनोयेषुतादृशाः शिवे
नकल्याणेनालिंगितानाम् तेयोयेषांतथाभूताइति अथश्रितास्तमाभूमि
र्यैस्तथाभूताः रक्तस्य रुधिरस्य भवः स्थानानि वाभिः कोष्ठीभिरालिंगितम्
तेयोविग्रहस्यशरीरस्यतर्पणेननाशेनगताअसवः प्राणाइंद्रियाणिचयेषां
तथाभूताः शेरतइतिविरुद्धप्रतीतिः ५६ अलमिति ॥ कस्यांचित्कामि

राम
२४

त्यामनुरक्तस्य कामुकस्येयमुक्तिः चपलेत्यादि हे नवो गगनासंगममनिष्टतया
योजनीयाः नयाचानि चपलत्वादस्थिरत्वात्स्वप्नः स्वप्नस्य दृष्टिः मंजारिना
ग्रस्तुदर्थप्रकाशनं मायातत्सदृशत्वात परिणातिविरसत्वाद्धि रहादिदुःखा
नुबंधत्वाद्वागनायाः संगमेनार्थप्रयोजनाभाव इति तत्त्वपरमार्थज्ञानहीनोऽ
नेकवारं यद्यपि भ्रान्तो वयामस्तदा तथापि अनंतरान्मादृशिणातीं नवि
स्मतीत्यन्वयः अवत्वादित्येकदेशः स्कन्निकटुः ५७ नरूक्वेति ॥ कुमार
संभवे कामर्तीद् स्मा क्रियम हे काम तत्तस्मात्सिद्धे कार्ये सिद्धार्थे गच्छ कार्ये
किं तत्राह देवानां सर्वेषां नमभेव कार्ये स्कंदोत्पत्तिरूपं कुरु शिवयोः संगमे
कल्पम्भेऽस्मिन्नर्थे किं मयेति शंकायामाह अर्थ्योयमिति अर्थीन रेणा उमा
महेश्वरसंगमेन लभ्यएवलभ्योप्ययं स्कंदोत्पत्तिरूपोर्थः अंगस्य स्वरूपस्य
लब्धे लाभाय प्रत्ययं शिवस्य पार्वतीवशतां संपादनेन कारणं अर्थित्वा
मपेक्षते अत्रोमहेश्वरसंगमस्य वक्ष्यमयो गयत्वार्थ्यांतरत्वेनोक्तिः कः
किमिव बीजांकुरः उदयान्वागं भोजलमिवेत्यर्थः अंगेति कामसंबोध

नमितिकेचित् प्रत्ययमननमंत्रामितिकेचित्यावः अत्रत्वचतर्थंतपदद्वयै
कदेशः ५८ यस्येति॥ तत्रैवहिमालयवर्णनम् यस्माद्हिमालयःशिव
रैःकरणभूतैर्धातुमत्तांगैरिकादिधातुमत्तोभावस्तत्तांविभर्तीत्यन्वयः
कीदृशींअप्सरसांविभ्रमार्थंविलासार्थंमंडनान्यलंकरणानितिलक
पत्रकादीनितेषांसंपादयित्रीं विभ्रमेणसंध्याकालभ्रमेणयानिमंडना
नीत्यर्थः अतएवकालसंध्येत्येतिकेचित् तथाबलाहकानांमेघा
नांछेदेषुविभक्तोरागोयस्यास्तथाभूतां अकालसंध्यामिवेत्युत्ता त
दकालेपिनद्धत्वासनात् अकालसंध्यावर्षासंध्येतिदीपिकायांचित्रमे
घच्छन्नःसंध्यात्कल्पकालइतिमदेशः एतन्मतेत्वुपमापिसंभवति सं
ध्यायाअपिनिमित्तत्वेनमंडनसंपादकत्वात् बलाहकच्छेदेषुविभक्तोरा
गोयस्यामितिविग्रहात्रविशेषणद्वयान्वयोबोध्यः अत्रमत्तेत्येकदेशः
चीनार्थेनसमसिद्धइतिनिहतार्थता ५९ आदावेति॥ इदंत्वाविरहा
तुरायाःकस्याश्चिद्वर्णनमिदम् ऊरंगेच्छणकाममतिशयेनाप

यस्या संप्रत्येव दृष्टां निषेकं कुरु न तु त्यान्वयः उत्प्रेक्षते चेतोभवो देवस्य मद
नस्य भल्लीनां बाणविशेषरूपाणां पानकर्मे वेति दशाहस्यार्थवशाद्भिन्नक्र
मत्वं धारातेलाणपायासंपर्केन लिप्ताः शौ संताप्यपयसा तालनेपानकर्म
स्वरूपं तत्र लेपतापयोः संपादनाय दृशां विशेषणद्वयमाह आदावित्या
दि आदौ प्रथमं अंजनपुंजेन लिप्तवपुः स्वरूपं यासां तथाभूतानां भल्लीनां
मध्यं गारचूर्णं जलेन लेपात तथाभूतत्वं ततोनंतरं श्वासानिलेनोल्लासितः ।
संधुक्षितो तत एव प्रोत्सर्पन् सर्वांगव्यापी यो विरहानलस्तेन संतापितानां
चेति भिन्नक्रमश्चकारः भल्लीनां तमस्ताभ्यासानिलोल्लासितेन प्रोत्सर्पता वि
रहसदृशेनानलेन संतापितत्वमवसेयं अत्र दृशामिति बहुवचनमनर्थकं
६० चापेति ॥ रावणहन्तस्य परशुरामे प्रतीयमानोक्तिः हे राम तव चापाचा
र्याचार्यः धनुर्वेदाध्यापक स्त्रिपुरविजयी महादेवः तथा कार्तिकेयः स्कंदो
विजेयो विजितः शास्त्रेणाभ्यस्त उत्सारितउदधिः मदनं गरुडं पृथिव्यां दत्तायां
परशुरामस्य निवासाय पश्चात्तापितेन समुद्रेणाभूदेतेनेति पुराणकथाप्र

का॰टी॰
उ॰ व॰
४६
86

तिहिः इयं स्पर्धी हन्तकारः ग्रासषोडषकं पुष्पलं तिथिमितान् हन्तकः प्रणायदते
नर्थः एतत्सर्वं प्रशस्तिः इन्दुररतेव नकस्मापयच्च संदेहः किमु किंनरेणकाया।
मानः कंठगायां कंठछेदनं कृतवत्तात्तवपरसुनावइस्यशीअंद्दहासोनामागव
णस्य वृद्धोलज्जते इति भूगपा एवंविधनिंद्यकर्मकारिणा त्वया सहदस्यधिक्ताराव।
णोलज्जत इत्यर्थः भवति हन्तकारोतिथिदानमंत्रः तत्संबंधाद्दूरेवतथेति मर्दे
शाखाख्यानेन ग्रासषमाणामितासात्दयत्रामवचन इष्टं ग्रासंचत्वारोणपादू।
हन्तकारं द्विजोत्तमाः इति मार्कंडेयपुराणवचनात् लोकेन निबंधनत्वाद्दना
देयम् अत्र विज्ञेयं इति यमस्तस्य: क्रमस्य यार्थीवाचकः ६१ प्रतिवेलवमि
ति ॥ प्राव: अतिपेवं लं कोमलं अतिपरिमिता अत्यावर्णीयत्रतथाविधं लघु
तरं अतिमंदं उदाहरतीति वदति पुनरितित्वर्थे परमार्थेलसपाठः कालकूटे
नविषेणवदितमिवहृदयं वदति तथा चकृत्रिमतयातद्वाक्यमश्रद्धेयमि
ति मित्रं पत्नाग्रस्यो पदेशोयं अत्र पेलेम कदेशो लाटभाषायां हृषणाद्दप
गुह्यांगबोधतया व्रीडादायी ६२ घटति ॥ कस्यचिन्महापुरुषस्यग्राम

राम
८६

नमिदम् सोयं पूर्वोक्तगुणवान् महापुरुषः कस्यचिद्देवपुण्यशालिनः पुंसो
दृशोः पततिगोचरीभवतीत्यर्थः सकः यः स्मरसरितं गंगातन्मयत्वानितत्पथा
नानितन्मयत्वानिवायावानितीर्थानितेषां सार्थे समूहे स्नाने नतत्पथाशास्त्रस्यवे
दांतादेः परिशीलनेनाभ्यासेन यत्कीलनं संस्कारदार्ढ्यं तेन धूयते पवित्रो भ
वति कीदृशः सोजन्यमानयोर्जनिरुध्यानं तयोर्जनिरूप्यतिर्यस्मादिति वा सो
जन्यमानस्येतिपाठे सौजन्येनमान्याजनिरूपतिर्यस्येत्यर्थः ऊर्जितानां बलवतां
ऊर्जितं बलं ऊर्जितानां बलानां मपि बलमिव वा अत्र प्रथमेकदेशो विकृतरूः
पिरत्नरूपपूर्वव्यंजकतयाग्रामादायी ९२ विनयेति ॥ रैवतंगयः सततं विनय
प्रणययोरेकं केतनं स्थानं तादृशः तद्गुणवत्त्वेन प्रसिद्धो भवत्सेवनस्याभिप्रेत
मभिमतं परमर्थार्थ्वी चं समागतः प्राप्तः सन् तदत्र सर्वं चन् कथमीत्वतादृश्यतो
नीचपदप्राप्त्यागुणविलोपादितिभावः तदेतत्सख्यायं प्रतिकस्यचित्पूर्ववृत्तमे
व्रीकस्यपुरुषस्यवृत्तांतकथनं केचित्तुनायिकायाः सखीं प्रतिनायकवृत्तां
तोक्तिरियम् अंगहे सखि यस्मादृशो नायकस्यासीत्सोद्यतस्याः सपत्न्याश्चभि

प्रेतं परं समागतस्तत्र हृष्टो भूतस्तत्र हस्तागच्छत् कथमीदृशानां अन्यथार्थस्यानुपपत्त्य
र्थ इति योजयंति अत्र शेनैत्येकदेशोऽमंगलार्थः ९४ कस्मिन्निति ॥ अस्य पुरु
षस्य गुणपत्ने दीयते अत्र चरेत्येकदेशो भूतपूर्वे चरडिति चरट्प्रत्ययो वा चरेत्
इति टांतस्य रथान्तर्वेति संदेहात्पूर्वं साधुरिति वा साधुश्चरतीति वार्थ इति संदेहः
९५ किमिति ॥ भूपालमौलीनां मालालालितेनाध्यवसितापंक्तिस्तत्र महामा
णो मेरुस्थानीयमणेरस्य राज्ञः किमुच्यते किं वार्पितं न किमपि वर्णयितुं शक्यं
यस्य तेजः वचो वाणी गीर्वाणैर्देवैः सदुर्लभं विभाव्यते ज्ञायते इत्यर्थः यत्र भू
पालमौलिगतमालामहामणेरिति महेशेन व्याख्यातं तदसंबंधत्वादुपेक्ष
णीयम् अत्र वचः शब्देन स्वशक्त्या निरूपितवाचकत्वसंबंधेन गीः शब्द एव
न्यस्तेन गीर्वाणशब्दयोरेव मिलितयोर्देवरूढत्वात् [illegible]
न च शब्दत्वे [illegible] प्रयोजनं वेति नेयार्थत्वम् ९६ अकुंठेति ॥ नायिका
संग्रामोत्सुकस्य कस्यापि वि[illegible]यमुक्तिः हे कुन्तकेवि कलो मधुरस्वरलघुकः
कंठो यस्याः सा यथाविधे इति धूर्तसंबोधनं विरहातुरतया कोकिलायावा

का. टी.
उ. चं.
२७
37

राम
२७

मांकंबुकंठ्याः शंखसदृशीग्रीवायाः नायिकायाः कंठेलग्नं कृत्वा तदालिं
गनयालिंगनंकृत्वेत्यर्थः कंठस्यालिंगनतदालिंगनेनोत्पन्नकरूपाम्भइरस्यपदरं कौ
हृयांसांश्राकंठकंठपर्यंतेनयुक्तं अतिसहृत्ताराजत्तरोत्तरोत्तरं एवंईमानेनित्यावत्।
यावि धायात्कंठगतयाहृणंब्याघ्रमित्यर्थः अत्रस्पंगारेष्वत्रटवर्गोद्धत्यादिनाप्र।
तिषेधात्तवकारः प्रतिकूलः ९७ देशइति॥ वेणीसंहारेस्वयाम्नः कर्णी
प्रतीयमक्तिः यस्मिन्नरामोनांशत्रूणांशोणितरूपैर्जलैः पंचहृदाः पूरिताः
अपीत्यवश्यरामेणसोयंकृतेत्रैरूपोदेशः तातस्यद्रोणस्यकेशग्रहाद्धेतोः
तथाततातियादेवयथैवयुष्मानयाविधः कार्तवीर्यार्जुनात्जमदग्नेरिवपरि
भवः अहितानांशत्रूणांयारेतयः शस्त्राणितेषांतेषांवस्राणिभस्मका।
णि अतएवगरुणाश्रेष्ठानिमेममआस्वंतिभास्वराणि अस्त्राणिब्रह्मास्त्रा
दीनितान्येवयानिमत्तातेनपरशुरामात्प्राप्तानिअतःकोधलोङ्गेणात्मजो
महत्तरणोजनः यत्नरामेणपरशुरामेणकृतंपितृवैरनिर्यातनंतदेवकुरु
तद्दत्स्वयः अत्रवैदेष्वटवोवर्णाप्रतिकूलाः ९८ प्राणिति॥ कृतपि

नाकधनूमिंगंरामंप्रतिभार्गवस्येयमुक्तिः सपरशुः स्वगणानत्वत्कंठपीठनितिष्ठिभं
वत्विति संबंधः सकः येनानेन परशुना हरो देवः जगत्स्त्वखंडपरशुरिति ख्या।
पितेप्रसिद्धः क्रियते हरेणास्य परशोरेकः खंडः परशुरामायदत्त इति प्रसिद्धेः
यद्वा खंडयतीति खंडः खंडयामास ततः परशुर्यस्येत्येवं व्याप्यते रिपुखंडनेन तच्चा।
सत्वेन प्रसिद्धः क्रियत इत्यर्थः तेन यदुत्रस्तया खंडितं तत्परशुनात्वमपि खंड
नीय इति ध्वन्यते कीदृशः परशुः प्राक् पूर्वमप्राज्ञो निःशंभोमननं भंगो वाये
न तथाभूतस्य शंभोर्भवस्य शंभुसंबंधिनो धनुषो यद्देधाविधाद्वैधीकरणं तेना।
विर्भवन्यः क्रोधस्तेन प्रेरितो योभी मो भयानको भार्गवस्य ममभुजपवस्तंभ।
स्तेनापविद्धः क्षिप्तः अतएवाशिथिलो वेगवत्तरः तथा उद्दृता ज्वाला नादीप्तिर्य
स्य तथाभूतः अथागतः परशोरनिवारणीयत्वद्योतनायातिपितोक्तिः त
स्य च पीठारोहणे चित्तास्थीवत्वारोप इति बोध्यम् अत्र चतुर्थपादे गुरुस्वर
णेन भावोद्रेकात्तद्दोचित्ये न मसृणवर्णविन्यासः पादत्रये तु रौद्रप्राधान्या।
त्तदुचितो विकटवर्णविन्यास इति ९९ धीरइति॥ अत्रमइतिसावधार

णां तेनात्र जगति सण्वन्यो धीरत्वादिगुणयुक्तस्तस्मिन्नन्वयः वरः श्रेष्ठः आकारो यस्य सः यस्य भृत्याः सेवका बलेनोत्सिका दृप्ताः बुध्या प्रभया तेजसा चान्विता युक्ता इत्यर्थः अत्र पूर्वार्द्धे गौरुत्वप्राप्तिरूपा हि सर्गो पद्मानाद्युत्तरार्द्धे च तल्लोपाद्धंथ शैथिल्यम् ७० राजन्निति ॥ हे राजन् भवतस्तानि चरितानि विभांति शोभंते यानि रसातलेपातालेऽत्यंतः गभीरदृशोरर्दं दोर्धुलिं दधति धारयंति इंदुवत्प्रकाशमानानि संनीत्यर्थः धीर्नीत्यनुसारिणी बुद्धिः दोर्बलं बाहुबलं ते उभे विजयस्य संपदं संपत्तिं प्राप्य भातः शोभते अतिततेऽतिविस्तृते उचितयोरवसरयोरन्यूनानतिरेकेण आत्तन्वती कुर्वाणे यथोचितावसरानुसारेण प्रवर्तमाने इत्यर्थः उचितान्यूनातिरिक्तविस्तारः तयोचितान्यूनातिविजयसंपदं चातन्वती दोर्बले तत्त्वन्वयप्रदर्शनेन दीपिकाकृतामयुक्तम् संनिहिततया संपदमित्यनेनान्वयो न्यूनस्य एतेन तस्याध्याहृतेन तामित्यादिनान्वयस्यानुचितत्वात् चकाराभावाच्च एतेन त्रण्छितिपाठे तन्निरवद्यम् एषु चरितेषु मध्ये उचितेत्यादेर्धीदोर्बलविशेषणत्वेन मागमप्रसक्ता इति नीउतिरूपापत्तेरयुक्तम् अत्र पूर्वार्द्धे नियततया एकच्छिकः संध्यभावः सकृ

इपिदोषः उत्तरार्धेव्याहृदेहि वचनं प्रतिगृह्य मित्यानुशासिक प्रगल्भसंज्ञा प्रयु
क्त्वाद सङ्गदेवेति ७२ ततइति॥ पतिंवरां प्रभुमिमव्याहृयमंक्तिः ततः पूर्वोक्ता।
मिनरयमुदितउत्पन्नः कस्मात्कइव उच्चैरत्युच्चाद् उदयाचलादिंदुरिव कीदृशः उदा
रे स्महत्तादारे णादारिणी मनोहारिणी मनोहारिणी द्युतिर्यस्य सः इंदुरप्युदारह
रवत्वहारिद्युतिः एवंविधोयं निजवंशे मुक्तामणिवच्चकास्तिदीप्यते मुक्तामणेर
पिवंशे समुत्पत्तेः कीदृशः उदात्तागुणहारांता रमणीयाकांतिर्यस्य तथाभूतः न।
यात्यनर्घ्यः श्रेष्ठः अमूल्यश्चेति श्लेषोपासिद्धत्वप्रयुक्तः संध्यभावः ७३ वेगादि
ति॥ नायकाधिष्ठितं संकेतस्थानं वापयंत्याहृत्याद्रयमंक्तिः हेसखि अयं पचीप।
त्री वेगादुड्डीयगगने चलन् उत्पतते उत्तपतंगोभवति ततस्तस्मादचैव प्रदेशे रुचिं
प्रीतिं अवस्थितिमितियावत् कुर्वित्यन्वयः कीदृशः डामरमुद्भटं चेष्टितं यस्य सः
डामरं उमरुवाद्यं तद्वच्चेष्टितं यस्येत्यर्थः त्यस्य अचचलं डामरेतिरुचिं कुर्वितिच
सन्निकर्षरूपसंध्युपस्यापिताभ्यां त्वं डाविंकुशाद्याभ्यां पूर्वांजनयोन्यं कुरयोप्र
तीतिरितिच्छेकोलः संधिः लाटदेशभाषायां चिंकुशाद्वेनयोन्यथाभिधानादि

का॰टी॰
उ॰ च॰
८९
४१

राम
८९

ति ७३ उर्व्वीमाविति ॥ अध्वगं प्रतिकस्यचिदुपदेशोक्तिरियम् अत्र मरुदेशस्यां
तेः समीपे चारुरवस्थितिर्यस्यास्तया भूतया उर्वीमहत्तीनवीनलीनरूपं क्तिरस्तीति शेषः
अत्र स्नानपयसा स्नानयागं नतं न युज्यते ततस्मान्मनागीषत् शिरोनमयन्नीचैः कु
विलम्बयः त्वमते इति पाठे जने इत्यध्याहार्यम् अत्र संधिः श्रुतिकटुत्वं ७४
अहतमिति ॥ अत्र द्वितीयममृतपदं स्वादुतरत्वरूपार्थान्तरसंक्रमितमिवाच्यम्
स्वादुतरत्वायोगमवच्छेदो व्यंग्यः तथा चामृतं स्वादुतरं अत्र कः संदेहः मधन्या
पिबन्न्या अमधूनि न मधून्येवेत्यर्थः मधुराण्यपि तियावत् चूतस्याम्रस्यापि प्र
सन्नरसं स्वच्छरसं फलमधिकं मधुरं कः संदेहः इत्यनुषज्यते पुनरिति परं त्वित्यर्थ
कम् परंतरसानामंतरं तारतम्यं वेत्तीति तथा अभूतो वा जनो मध्यस्थः पक्षपातरहि
तः सन्नु इह जगति प्रियाया दशनच्छदादधरात्तदपेक्षयेत्यर्थः स्वापुमधुरं यदन्य
स्यात्तत्सकृदेकवारमपि वदतु तथा च न तादृशं जगति विद्यत इति भावः अत्र ह
रिणीछंदसि षष्ठे वर्णे समविततायायतेश्च तुर्थपादगते षष्ठे हि तिवर्णे भंग इत्यस्य
वृत्तम् ७५ जंपतीति यत्परिहर्तुं तीर्यते मनागपि न सौंदर्यगुणेन अथ केवलं

म४

का.टी.
उ.खं.
५०
९०

यस्य दोषः प्रतिपक्षैरपि प्रतिपन्न इति संस्कृतं मानवतीं प्रतिहृत्याः समाधानोक्तिरि
यम् तथाविधमेतत्कार्यं चेष्टितं यत्सौंदर्यगुणेन रमणीयतारूपेण गुणेन मना
गीषदपि परिहर्तुं न नीयते न शक्यते अथ च यस्य दोषः पूर्वोक्तापरिहार्यतत्त्वरूपः
प्रतिपक्षैरपि ब्रह्मचर्यादिभिः केवलं प्रतिपन्नोंगीकृतः न तु परिहृतः तत्कांता
स्वतत्त्वैकवक्तव्येति तस्य दैवादन्यवनितासंगमेपि कोपातिशयो न विधेय इति भावः
अहेतुत्वयमित्यर्थकमिति चंडीदासः अन्ये तु यः परिहर्तुमिति संस्कृतं प्रदर्श्य यो
नायकः सौंदर्यगुणेन अपराधशीलोपि त्यक्तुं न शक्यते यस्य दोषोऽपराधः प्र
तिपक्षैरप्यस्माभिः केवलं प्रतिपन्नः पूर्वांगीकृतप्रकारेण समाहित इति व्याचक्ष
ते तच्च यथास्थितपाठे य इति संस्कृतप्रदर्शनं कथं संगच्छत इति चिंतनीयम्
ज्जो परिहरव्वमिति हिततदाप्रकृतपाठे न भवितव्यमिति अत्राचार्याणां हितीयस्य दूरि
३४ उमित्यंतगुरोः सगणस्यानीरइँतित्तृतीयस्यादिगुरो भगणास्यर्यावत्वंछंदः शास्त्र अ३
सिद्धं ७९ विकसितेति वसंतः मनेरपि मानसंहरतीत्यन्वयः कीदृशः विक
सितानां सहकाराणां माक्षतानां तारउद्दोहारी मनोहरश्च यः परिमलस्ते

सा५
राम
५०

नगं जितागं जनयक्ताः पुंजिताः पुंजीभूतास्तद्विरेफाश्च मरायत्रतथाभूतः यश्च
वातथाविधः परिमलो यत्र सचासौ मांसजितपुंजितद्विरेफश्चेति विग्रहः स्वनिमनो
हारकत्वसमर्थेनाप्यवसंतगतत्वप्रकर्षाधायकतया विवक्षितस्य तथाविधपरि
मलस्य शाहृतोव संतानस्य यस्य भवेच्चार्थतत्वं बंधानुधावनस्यानुचितत्वात्
पुनः कीदृक् नवकिसलयानि नवपल्लवान्येव चारूणि मनोहराणि चामरा
णि तैः श्रीशोभा यस्य सः अत्रादिपादांत्यस्य रिकारस्य गुरुत्वानुशासनेपितत्का
लीनत्वमत यास्यत्वतम् ७७ अन्यासां इति ॥ कस्यचिद्राज्ञो वर्णनमिदम् सप
क्षपुत्वा विनाद्यैः परार्ध्यैः सृष्टउत्पादितः ताः नरेंद्रतगताः गुणादृपाणां रत्ना
नां संबंधिनो रोदनास्य रत्नानिवस्यानभ्रतपर्वतविशेषस्य भवोम्भूमयः अ
न्याविलत्वगाद्रस्यर्थः एवमत्रेपि सृदुपादानभूतपार्थिवभागरूपा संभारा
उपकरणानि सकः यत्र यस्मिन् देहे सन्निहितानां करत्वादस्त्राणि पतंति स्त्रीणां
नितंबस्थलादयस्तानि च पतंतीति योज्यम् श्रीमदित्यादि सृष्टेत्यादि च द्विषां
स्त्रीणां च विशेषणं मे[illegible] अद्विषां भयपुष्कः स्त्रीणां तु कामवेशादित्यूहनी

का. टी.
उ. ७.
९२
९१

यस्य यत्नैर्यैरित्यत्र यद्भवगणाशरत्नयत्नस्तत्सदृशैरिति शेषः तदेव तत्स्वरूपया
कांक्षापूरणादिति महेशेनोक्तम् तदयुक्तम् याभिश्चयैश्चयैरित्येवं पुमान्।
स्त्रियेत्यानुशासनिकैकशेषाभ्युपगमनैवोपपत्तेरिति अत्र श्लोकान्तस्य गुरुका
र्यान्तमन्तम् ७८ सान्तपेति ॥ राज्ञिस्तेन तदीयानां विलापोयम् ॥ मृगस्य सं
दर्शनभांतरेसभामध्ये रत्नभूत त्वंकगतोसि नवसंबंधिन एते दृष्टगवस्यावय
चक्षुर्वनत्वं दृङ्गतास्मृ इति शेषः अन्यानां सुंदरीणां विरुद्धसभानामंतरे रत्नभू
तेत्यर्थे इति महेशः अन्येकं हापदैर्नृपत्वादेर्भत्येकं प्राधान्येन शोको हीपकत्वं व्य
ज्यते इदं दीपकत्वं तद्धास्यव्यंजकतयाशोकानुगुणम् ७९ तथाम् तामिति ॥
ततीयोल्लासएवव्याख्यातमेतत् अत्र वल्कलधरैरित्यस्य विशेषस्य साकांक्षत्वा
त् स्थितमित्यस्य चकैरिति कर्तृसाकांक्षत्वादस्माभिरित्यपेक्षितम् तथा वेदमि
त्यनंतरमित्यमित्यपि अन्यथा विदस्य पूर्वोक्ताथैरेकतालाभेन रेतसाकांक्ष
त्वापत्तेर्मासर्यानोचित्यापरिपोषाच्चेति न्यूनपदत्वात् नचदृष्टाविन्नेइत्यत्र।
याहित्यमितिमर्यमितिवाच्यम् इत्युक्तस्य गुरुणोवानयात् अन्यथान्नोचि

राम
९२

त्यासंगतेरितिदिक् ८० स्फारिकेति ॥ कस्यचिद्विदुषो वर्णनम् सर्वकृतोवि
द्वान् कोपिश्लोकोत्तरइत्यर्थः कीदृक् स्फटिकाकृतिवत् निर्मलं स्वच्छांतः अ कररणः
तएव प्रकामं अत्यर्थं प्रतिसंक्रांतनिशांतेतोत्तमतिवैयंउतियावत् शास्त्रत
त्वंशास्त्रस्यावाधितार्थोयत्रतथाभूतः एवमवरुद्धासमन्विता संगता उक्तियु
क्तिः उक्तियोजना यस्य सः अविरुद्धं यथास्यात्तथा समन्वितउक्तियुक्तियेनेत्यर्थ
इतिकेचित् अविरुद्धैर्थैः समन्विताः संबद्धा उक्तयो युक्तयश्च यस्येत्यन्ये पुनः की
दृक् प्रतिमल्लादीनां प्रतिवादिनामसमयस्य लक्षणायापराभवस्योदयः प्रा
दुर्भावो यस्मात्तथाभूतः कदापि केनाप्यपरिभूतानामपि पराभवकर्तेत्यर्थः ए
तेनोदयपदस्याधिकारपरिहारायग्रदयइतिभिन्नपदत्वेन महेशाकृतं व्याख्यानम
नादरणीयम् अत्राकृतिपदमधिकम् ८१ इदमितिति ॥ इहजगति पुंसां जरादव
पिनद्धावस्थास्वपियतमान्मथः कामसंबंधिविकारः इदमनुचितम् वैरस्याध्या
यकत्वादयुक्तम् तथाच्यमक्रमः अवशालापरिपाटीक्रमसंप्रदायइत्यर्थः बाल्य
यौवनजरास्वविद्याविषयोपभोगधर्मोइतिशास्त्रोक्तसंप्रदायस्यैवावस्थानुरूप

नः २ कारस्याः ९ नं०

नयास्तमीचीनत्वात् तथोऽप्याशास्यार्थकत्वात् यदपि च निर्विनीनां स्त्रीणां जीवि
तेश्वरं वा स्तनपतनमवधिरुक्तरावधिर्यस्य तत्तथाभूतं न कृतं कथं द्विधा चातदप्यनु
चितं पूर्वोक्तादेवहेतोः अतएवक्रमंप्रदायश्चेति योज्यः अन्ये तु अनुचितं लो
कविरुद्धं अक्रमं शास्त्रक्रमविरुद्धं इत्यनुचिताक्रमपदयोरर्थमाहुः तदयुक्तं
जीवितेश्वरस्तनपतनपर्यंताकरणे तदसंभवात् नहि स्तनपतनानंतरं जीवित
रतयोर्लोकविरोधः शास्त्रविरोधो वा कस्यापि संमतः इति पूर्वोक्तमेव ज्यायः इति
अप्रकृतमित्यधिकम् ८२ अकरतलेति ॥ करतले कपोलतलमाधाय विं
तयंतीं नायिकां प्रति सख्या उपालम्भोक्तिः हे सुतनु करतलं चपेतल्ये इत्यधि
करतलं तल्पं समग्रमस्यर्थे अव्ययीभावः कल्पितास्वापलीलायया तथाभूता
परिमलेन करतलचर्षणेन रक्तिमोदयात् निमीलन्नितो मवक्र पांडिमा
यस्यास्ताहशी तवगंडपाली गंडस्थली कर्णीकस्य पूनः स्मरनरपतेर्लीलायां व
शीकरणार्थपायां यौवराज्याभिषेकं अंजसा तत्वतः व्यंजयतीति सूचयतीति क
थयेत्यन्वयः यः स्मरे राज्ञस्यपंकत्वेमशाकं तवे वंशिथं स्थापादि करोति सभ्रुवं

का० टी०
७० वं०
५२ नयो
६२
नेः
राम
५२

हृदेनस्मरेणास्याराज्ञोभिषिक्तइतिभावः अनेनकंदर्पात्स्थाधिकंवशीकारकत्वंध्वा
व्यंजितंभवति अत्रलीलेत्यस्याहि:प्रयोगात्कथितपदत्वम् ८३ कःकइति॥क
स्मादित्याक्षेपकस्कइतिप्रश्नत्वम् पंचाननःसिंहोयतःयस्मात्सिंहस्याह्ने(?)नयोविला
सःकंडूयनादिस्तेनवज्रास्थिरीकृतावमतिःस्थितिर्येनतथाभूतोवर्तते अतः
कं कःस्वकरःकुत्रनक्षुरेशोमंशाहेकेयोदपितून्नमसमध्यमाधमत्रूप:सर्वएवसर्व
त्र क्षुरभीमशाहेयोद्रिनिर्दोपिंपुंगा क्षुरेत्यर्यर्थेतिमदेशः कीदृक्कवर्त्तुरयिनाता
दृशशाहवतीयाक्षुरीनामिकातयाघोरःभीषणः क्षुरीपोत्रंमकरमुखादयमित्य
न्येक्षुरीवाद्यविशेषस्तद्वत्घोरडत्यपरे एवंकःकरीहस्तीकंकमल्लानामाकरंउत्प
त्तिस्थानंविगतकमलंकर्तुंनोद्यतः अपितुसर्वःसर्वमपिकेकेअरण्यमहिषाः
कानिवनानिनोन्मूलयेयुरपितुसर्वाणिसाम्प्रयोन्मूलनेनमदोन्मत्तत्वं सूच्यते
एवंचराजनिवसनशीलेहस्तद्राश्यपिभोमिकानिर्मर्यादाभवंतीतिप्रस्तुतध्वनना
दप्रस्तुतप्रशंसालंकारः अत्रवाच्यस्यसूकरादेरुत्तरोत्तरमुत्कृष्टतयातथैवस
मुचितस्यबंधप्रकर्षस्यभंगः उत्तरोत्तरंतदपकर्षस्यस्फुटत्वात ८४ केंकार

नं ४

का ४ दि ५

का १

इति ॥ स्वस्टदं पतिप्रस्थितान्पथिकान्प्रतिकस्यचित्कवेरियमुक्तिः तन्व्याः
कंचुलिकाया अपसारणे,यो द्रवद्भिः क्रियमाणो सति योर्भुजयोरातेपो धून
नं तेन स्खलतां कंकणानां क्वाणाः शब्दाः वो युष्माकं प्रेमप्रीतिं तनोत्विति सं
बंधः कीदृशा रत्यपेक्षायां कंकार इत्यादीनि पंचरूपकाणि केंकार इत्यादिध
न्यधीनेरनुकरणं स्मरतत्क्रीडार्थे पिकस्य एव वा पिकः कोकिलाः इतिरेव
विलासादि फलोत्पत्तिस्थानत्वान्मंजरीतत्संबंधिनां मधुलिहां झंकारः वा
ति मंजरीमधुलिहां लंपटतया तत्वेनाध्यवसितानां कामुकानां झंकारोहर्षी
द्रवचुंबनादिशब्दः तद्वेतुतया तत्वोपचारः आपुरुहूतमिति वदंतिकेचित्
रत्यर्थ्यामंजरी तत्संबंधिनां मधुलिहामित्यन्ये रतिरेवमंजरीमधुलिहांस्तेषा
मितिदीपिकायां लीलार्थे चकोरीलीलैव वा चकोरी पूर्ववत् नवंवयस्ताह
णं तस्य लास्याय तद्विलासादि रूपनर्त्याय वेणुस्वनः वंशीध्वनिः नवं वयो यस्या
स्तादृश्या तरुण्या लास्याय स्मरतद्रूपनर्त्यायेति अत्र समासान्तमेव वा कं नवेत्या
दि विशेषणानस्यान्वयाय पुनरुपात्तम् ८५ मसृणेति ॥ जनकपुत्री सीता

का॰ टी॰
उ॰ वं॰
९३

93

राम
३३

पथिमार्गे पथिकानां बहुभिरश्रुपूर्णैर्लोचनैर्वीक्षिता इति पूर्वोक्तप्रकारेण ।
शिक्षिता चेत्यन्वयः इति किं हे बाले यतः भ्रूः सदभ्रोदभ्रोकुरसहिता न त्वस्मा
त्तमस्तृणोमं दस्युरणपातो यत्र तत्यारम्यतां एवं यतो ग्रीष्मातपः कठोरस्तीक्ष्ण
स्तस्मान्मम भिसिचयस्य वस्त्रस्यान्ते प्रान्ते विरचयेति अत्र पूर्वार्द्धान्वयिनस्तदित्यस्या
ध्याहारः गलत्यात्मनीति विल्लवः २८ येषामिति ॥ हनुमता लंकायां दग्धायां
वीरराक्षसानधिक्षिपतः कस्यचिद्रावणाग्रतोयमुक्तिः हे प्रभो येषां तपश्चारि
णां शतापसां चाभिः कलंभ्रेते स्त्वात्प्रसिद्धाः त्रिदशानां देवानामि म [illegible] स्पष्ट ।
स्तिन भगवतो व्यासस्य दानसरितः मदजलनद्यः पीताः शोषिता इत्यर्थः तयो नं
दनस्येन्द्रक्रीडावनस्य तरूणां छाया सलीलया यायत्वा नमस्थीत मयस्य तस्य भवो
भूमयः कल्पिता रचिता येषां हुंकृतयो हुंकाराः कृतो मस्थानेरिन्द्रस्य स्तोभोयाः ।
सिस्तथा भूता याः सन्निशोषः तैः तपश्चारिभिस्तव परितोषकारि प्रवादो वितं
सभायां कथनयोग्यम् प्रवादस्सस्तव्याख्याने रुचितं वा किं वितत किं वितंत्यपि
तनकिंचिदित्यन्वयः अत्र येरिपसत्तपश्चारिपदार्थैनाभिमतोन्वयो न भव

ये॰

ति॰

९४

94

तिभिन्नविभक्तित्वात् ८७ त्व[illegible]मेवेति॥ नायिकां प्रति दूत्याउपयुक्तिः॥

हे सुभगे त्वमेवं दृश्यमानोत्कर्षसौंदर्यस्यास्तस्याम् नासवशक्त तनायिको पी

त्पर्थः चकारस्याप्यर्थकत्वात् विरतायाः सुंदरतायाः परिचितः संबंधी

इह संसारे कलानां चातुरीणां परं सीमानं पराकाष्ठां प्राप्तामेव भेयः प्राप्ता। जप

यस्थः सीमांतमिति पाठेपि स्फुट एवार्थः ततस्मात् इति एवंविधं वा सुवयो

हृद्वं सुपुनरीदृशा भाग्येन संवदत्यपि परस्पर[illegible]योग्यमपि भवति यतः

पूर्वोक्ताकृतेष्वसमवशिष्टं समागमं रूपं यदि स्यात्तदानीमिह हंहे विद्यमानया

गुणितया जितं स्यादित्यनुषंगेणान्वयः तदैव गणितायाउत्कर्षोन्यथा

वैफल्यादपकर्ष इति भावः शेषं परस्परप्रेमेत्यत्व्याख्यानमप्युक्तम् तत्र तिः

यासति प्रेसणे सिद्धत्वलाभेनाभासतापत्तेरिति अवश्यदोषाभावाद्यादि।

त्वस्य च तदर्थबोधकत्वादभिमतान्वयलाभः ८८ सुमेति संग्राम एवां ण्वा ६

गाणां निर्भयसंचारात् समारोपिते मौर्वीमारोपिते सति देवेति संबोधनम नम

येन येन सह समाऽऽहरिति यद्य[illegible]त्समासादितं [illegible] प्राप्तं[illegible]। ८४

तेदाकर्णये५

तिसंबंधः केन किं समासादितमित्याकांक्षायामुत्तरार्द्धं तच्च समासादितमित
स्य वचनादिविपरिणामेन समासादिताः समासादितः समासादितेत्येवम
नुषंगो बोध्यः भूमंडले च राज्ञः समासादने स्वस्वामितयेत्यवगंतव्यम् ८९
वापाचार्य इति ॥ प्रागेव व्याख्यातं चत्वार इति वेणीसंहारे डुंडुभिश्च निमा
कर्णिरणयज्ञः प्रवर्तत इत्युक्ता भीमसेनोक्तिरियम् चत्वारो युधिष्ठिरव्यक्तिरि
क्तावयंभ्रातरोऋत्विजः यर्थात्संग्रामाध्वरे पंचमस्यापि योज्यम् सः सर्वज्ञत्वे
न प्रसिद्धो हरिः श्रीकृष्णः कर्मणामुपदेष्टा उपदेशकः सदस्यापरनामधेयः
संग्रामाध्वरे दीक्षितो गृहीतनियमो नरपतिर्युधिष्ठिरः पत्नी द्रौपदी गृहीत
व्रतेदुर्योधनवधपर्यंतं वेणीसंयमरूपं यया सा तथाभूता सपत्नीकस्यैव य
ज्ञाचरणोचितत्वात् कौरव्या दुर्योधनाद्याः शतं भ्रातरः पशवः तत्स्यन्त याव
ध्यत्वात् प्रियाया द्रौपद्याः परिभवः सभायां केशांबराकर्षणादिरूपस्तज्ज
नितस्य क्लेशस्योपशांतिरेव फलं राजन्यानां क्षत्रियाणां उपनिमंत्रणाया
ह्वानाय रसतो डुंडुभिः स्फीतं स्निग्धं यशो यस्मात्तथा रसति शब्दायत इत्यर्थः

का॰टी॰
उ॰वं॰
५५
९५

ताडने सति यशसो हेतुत्वाज्जयसूचनम् यशोडुंडुभिरिति पाठे यश एव डुंडुभिरि
तिरूपकम् स्फीतमिति यशोविशेषणं वा ५० जंघेति॥ जंघेति व्याख्यातं श
क् अप्राकृतस्येति रामेणाधनुर्भंगे कृते जनकस्याकिंचित्करियम् दृष्टैश्चेति भि
न्नक्रमश्चकारेणाकृतत्वमसद्वयः अप्राकृतस्य यत्किंचिक्रांतकानाकर्ष
णीयस्य अत्यद्भुतैर्दृष्टैः अनेकचरितातिशयैर्यो दर्पो हतस्य वशीकृत
तस्य ममतयापिनेषु नास्त्यनादरं इत्यर्थः अप्राकृतलोकोत्तरस्य रावण
स्य चरितातिशयैः कैलासान्दोलनाद्यैरिति केचित् एष पुरोवर्ती रामः वी
रशिशुकाकृतिर्वीरबालकाकृतिः अप्रमेयस्यापरिमितस्य माहात्म्यस्य।
सारांशस्य समुदायस्तन्मयः कोप्यनिर्वाच्यः पदार्थो वर्तत इति शेषः
न्यः अप्रमेयस्यानुभावस्यैवमिति कश्चित् मदेशस्तु चकारोप्यर्थे तथा च दृष्टैरपि च
रितातिशयैर्हतस्याकृष्टस्य ममतयापि नास्या दशरथपुत्रे गौवधनुर्भ
ञ्जमित्याश्वासेनास्तीत्यर्थः ननु वैरस्याभावादयमनाश्वासस्तत्राह
अप्राकृतस्येति प्राकृतोऽविदग्धस्तद्विलक्षणस्येत्यर्थः नहि किं संभावयसीत्यवा
प्ये

राम
५५

दृक्कोणेषदृति जनागमवदृत्यर्थः इत्याह ४२ एषोऽहमिति उर्वशीरागोऽस्य प्रेमोत्था
निरुद्धयोर्वासवसंगमे निरुद्धं संपाद्य गगनस्य कामुकस्येयमुक्तिः एषोऽहं कामः
प्रसृतरागस्य त्वामुत्तमगगनस्य तत्तां उर्वशीं त्वत्प्रेम्णा निरुद्धेन प्रद्युम्नसूतेन यावद्दृष्टना
समागमस्तेनाधिगतं मार्गं प्राप्तिप्रमूढयोगं पलस्य्या सौऽहं धैर्याद्रियः फलं यथा नया
मृतां विधाय संपाद्य मार्ग्याणगनं दृत्यन्वयः कीदृशः यद्दितनयायामारवप्रा
जन्मप्रयस्य तथा प्रभृतः दारानंतरं हरे गोवरेदत्ते गौरीवदनात् कामोऽस्मि निरिति नतु
रागप्रसिद्धिः पुनः कीदृक् कुसुमशरस्मरमनोरथानां दुर्वर्त्ती सुराधिरैर्मनसाप्यचिं
त्यगतिरित्यर्थः अन्यैर्द्वितीयांतरगम्यत्वसंभवमापन्नेः ४३ त्वयीति॥ विक्रमोर्व
शीयं उर्वशीं प्रति पुरूरवस उक्तिरियम् हे मानिनि मम कं अपराधलवं लेशं
पश्यसि यतो यस्मात् अपराधलेशात् हासमभूतं जनं मलत्यागात्त्यजसीत्यन्वयः की
दृशस्य मम त्वयि निबद्धरतेः स्थिरानुरागस्य तथा प्रियवादिनः एवं प्रणयभंगे
परात्मुखं न च दोषरूच तो यस्य तथाभूतमेवेवं विशेषणत्रयस्यापराधलेशाभावो
पपत्तिसिद्धाय गर्भत्वात् परिकरालंकारः अन्यापिल्लवमपीत्यवश्यं वाच्यम्

का॰ टी॰
उ॰ चं॰
५६

अन्यथाल्लवनिषेधेपिस्थूलसंभावनापत्तेः ५३ प्रियेणेति ॥ किरातार्जुनीये
जलक्रीडावर्णनेपद्यमिदम् काचिन्नायिकाप्रियेणकांतेनविपक्षसंनिधौसप
त्नीसमक्षंसंग्रथ्यसम्यग्ग्रथित्वापीवरौपीनौयत्रस्तनौयाविधे वक्षसिउपाहितां
निहितांजलेनाविलांम्लानामपिस्रजंमालांनविमदौनपरित्यक्तवतीस्तन।
यः कृतइत्याकांक्षायामाहवसंते हीत्यादि हियस्मात्प्रेम्णोगुणाश्चसंतिन
वस्तुनिप्रेमसत्वएववस्तुनउपादेयत्वविषयाकर्षकत्वयोर्दर्शनात्तदभावेचा
दर्शनादन्वयव्यतिरेकाभ्यांप्रेमैवोपपादेयविषयाकर्षकंचभवतीतितेनदेव
गुणावहिर्भाविः तथाचसपत्नीसमक्षंनिर्माल्यप्रेमपूर्वकंकांतेनहृदिनि
हितायाःस्रजोजलाविलत्वम्लानत्वरूपाभावेपिप्रेमास्पदतयाऽपरित्याज्य
त्वंयुक्तमितिभावः चकारवतिनस्तुप्रेम्णासतिवस्तूनांदूषणेनवस्तुमात्रइत्य
र्थमाहुः प्रेम्णोगुणाउत्कर्षाणनवस्तूनि प्रेमोत्कर्षएवोपपादेयोनवस्तूत्क
र्षइतिभावइत्यन्ये तत्रनकारोस्थानस्थः नकाविदपितत्सर्वाइतिविरुद्ध
प्रसंगात् ५४ त्वय्यइति ॥ शितिकंधरस्यमहादेवस्येंदुशकलेनचंद्र

राम
५६

त्विंदुनृनिरुद्धांतरे स्वापमध्ये अंतः कपोलस्थलमध्ये लग्नो मृगांकस्तदा का
रविंदूवः युष्माभ्यां न ज्ञातमिति संबंधः कपोलस्थले न महादेवस्येति।
केचित् पार्वत्याऽन्यस्येति कं दर्पणोपादानस्वारस्यात्तु चरमपद्य
एव युक्तः प्रतिभाति कीदृशेनेंदुशकलेन केल्याक्रीडया यः कचग्रहस्ते
न स्रस्तया शिथिलया जटया तस्यां लंबोऽलंबनं यस्य तथाभूतेन एवं च क
पोलसंबंधोपपत्तिः कीदृशो मृगांकः पार्वत्या नखलक्ष्ममार्गेण खविद्धे
शंकिता संजातशंका या सखी तस्यानमे स्मितेन लीलास्मितेन या क्री
डालज्जा तया हेतुभूतया करपल्लवेन प्रोन्मृष्टः मार्जितः तथाविधस्मि
तेन क्रीडायस्येति पार्वती विशेषणमिति पुनः कीदृक् कुटिलच्छायासावा
नाभृच्छविः दर्पदारकुंकाति: इदमेव वचनस्खलनस्य शंकाबीजमिति त
तः पूर्वमेवेतन्मदस्यानं प्रक्रम ४५ यद्यपीति॥ असौ दृश्यमानः शा
श्रीतनकतणोऽमलदिकसघनैरवंरुमदंतस्यकोषः कुड्मलएव।
कोशः त्वद्गुणपिधानकं तस्मान्निःसरता मनीनांशुश्रेणी पंक्तिरेव कृपाणाः

५४

ती

का॰ दी॰
उ॰ चं॰
५७
97

खड्गलतं कर्षन्त्याकर्षन्तीत्यन्वयः कुतस्तस्याः कांतायां हेतुमाह येति ते यया
पीताम्बरिएवमानः सीमन्तिनीनां हृदि यद्यपि मल्ला विशेषेपि स्थाने वांछा।
तिथि कर्तिर्य मिदमिति क्रोधादिवेत्यर्थः अत एव वाल्मोहितमारकः को
पेनरक्तिमोदयात् हृदि तेषां यांहेवगर्भे तद्विशेषणमाहस्तीनेति स्तना २८
विवशैलोत्तरूपेण दुर्गमा विषमेस्त्वनाकमणीये शशीकोकमोर्यंतो
दूरतरप्रसारिताः कराः किरणा एवकरा हस्ता येन तथाभूतः खड्गाक
र्षणोपि हस्तस्पर्शनयानात् योयन्त्रितिपाठे भिन्नमेव पराशिविशेषणम्
नत्त्वमादिति पाठे नन्तुगात्कर्षतीत्यन्वयः यत्त्वयापिममोदयेत्याख्या ३८
वी॰ नं तद्युक्तम् चारक्तमोदयेन ततः पूर्वमेव क्रोधकथनो चित्यात् को
पोद्दिष्टकृशयलोवाद्वपिधानेपी वहिर्द्वयोरित्यमरः अवचास्थानेदोषेस
मासः पूर्वार्द्धे एवकृडोक्रौतदोषविन्यात् ९६ किमितीति ॥ मानिनीप्रति
सख्यास्तत्रमुक्तिः अत्र पादगतं पादप्रणतं वडूगणां हृदयनाथं किमि राम
ति न पश्यसि उमकंठ[illegible]महारामनसस्तमोरूपं कोपमवेति वाक्यत्रय ५७

परस्परपदसंकीर्णम् ५७ परेभिस्वहम् ॥ अत्र संगतिर्न विधेयेति वाक्यं व
ग्रामीत्यपि वाक्यांतरेणाभिमतम् एवं च संगतेः सदृशत्वं संशयोत्पा
दकमंसाकांक्षत्वे निरूपकत्वाजमिति केचित् ५८ त्वमिति ॥
गृहाभियाष्टिरसनीतेनश्रीराजपुत्रीत्वेनाध्यवसिताबोध्या यस्य राज्ञः कौ
निर्वृत्ति यतिगतेत्वत्वयः फलस्वतते श्रियो नियोगादस्ति [illegible] याइति तस्य देशा
गादेवक्रामिवेति संदेशस्वरूपं लक्षणमित्याह्रिम्नस्येभ्यइत्यंतं तदर्थस्तु हेऽग्नि
बुधेराणोरुधिरलोहितमेवगतोनुरागसेनाहूतयान मंगं यस्यास्तया
भूतयायथैवास्मियष्टाविद्धयष्ट्याइहसंग्रामेऽरीणांकंठेस्वङ्गं यथासाततया
लग्नंयावास्मियष्टिः इहसंग्रामेमातंगागजाएवमानंगाश्चडालास्तेषामपरि
पतंतीपरेषांशत्रूणांपुरुषैः रेवप्रकृष्टपुरुषैर्हृष्टा तेनप्रकृष्टसाहित्सनता
नृ मिथ्यात्वशंकानिरासेनयात्विद्धयष्ट्यासक्तः संबद्धएवतस्यांसक्तोनरेक्षः
गृयंममसभर्त्तारराजानकिंचिद्युक्तायुक्तंगणयतिविचारयति यथाश्रुतेति
किंचित्पाण्डुरापादिकंनगणयतीत्यर्थः तेनयुक्ता[illegible] गणनाभावेन

युक्त

का. टी.
उ. वे.
५८
९४

हेतुनाहं मन्दभाग्योऽत्रागतोऽस्मि इदं तेन मया तु विदितमस्तीति तेन राज्ञेति कर्तरि तृ
तीयेति केचित् स्वरूपस्ते ग्रंगं रेखा विशेषण इति दीपिकायां एवमनयाभण्ण
शोयेदानत्वयशसामलकोवर्तिनः अत्र भवतोऽप्यद्यत्वं तव वाक्येकवाक्यम
र्थेऽविदितमिसारि[illegible]वाक्यांतरं प्रविष्टमितिविशेषः ५५ महाप्रल
येति ॥ वेणीसंहरणे रणकोलाहलमाकर्ण्य ततोऽश्वत्थाम्नः उपन्यक्तिः अ
यायं समरोदधेः संग्राममहोदधेः संबंधी तस्मात्संबंधीतस्मकाशाद्धा पूर्वं म
तोऽभूतपूर्वो रवः सिंहनादः मुहुर्वारंवारं कस्मादुत्तोरस्ताति प्रश्नः कीदृ
शः महाप्रलयमारुतेन तत्क्षुभितानां पुष्करावर्तकानां मेघविशेषाणां प्र
चंडं गर्जनं तेन विडंबयद्गर्जितं तस्य प्रतिरवस्य प्रतिध्वनेरनुकारी सदृशः त
थाश्रवणयोर्भैरवः भीषणः एवंस्फूर्जितोऽयं नाद इति यावत् रोदसी
द्यावापृथिव्योरंतरालमेवकंदरा गुहा तस्यामापनतः प्रतिध्वनितः अत्र रवशब्दस्य म
हुकादिशब्दस्य एवकविप्रयोगप्रसिद्धिः न तेवं विधे वीराणां गर्जिते इति तद
तिक्रमः नाघ्यइति निशायां नाथ्ये वंद्रे नियते दैवस नियोगादस्तंगते

म॰
ध्वि॰ ५॰
राम
५८

सतिनिशापितद्दूरसंयाता हृंतद्दषैति सचद्दशोन्तरूपत्वात् इदमेवार्थी
न्तरान्यासेन समर्थयति कुल्लागनानामिति यस्मात्कुल्लागनानां दशान्
तरूपं पतिविनाशाद्दशायोग्यमतः अनुगमनात्परमन्यत्तद्भद्दतरं शोभन
तरं न समस्ति नास्तीत्यर्थः अत्र गतेइति गमिधातोः प्रक्रमादयेपितस्य
योगयोचितोन त्वयातेति याधातोरिति प्रकृतेः प्रक्रमभंगः १०० उदेति॥ म
त्रिगदव्याख्यानं एवं चोद्दिष्टप्रतिनिर्देशरूपत्वयाकथितपदत्वाख्यदोषा
न्तवताराय यथाप्रक्रान्तमेव तान्नपदं प्रयुज्यते न यादर्शितोदाहरणेपिप्र
क्रान्तमेव प्रयोक्तुमुचितमिति सिद्धम् १०१ यशइति॥ किरातार्जुनीयेद्वौ
पद्यरूपमक्तिः यशोधिगन्तुमित्यादीनां अभियोगभाजामित्यनेनान्वयः
अधिगन्तुं लब्धुं मनुष्येषु संख्यागणनामतिक्रम्य वर्तितुं मनुष्यादुत्तमम्
त्कर्षं प्राप्तुमिति यावत् निरुत्सुकानां औत्सुक्यरहितानां अभियोगभा
जां उद्योगवतां अंकं उत्संगं अत्र सन्प्रत्ययप्रयोगात्तुंप्रत्ययप्रक्रमभं
गः १०२ तइति॥ कुमारसम्भवे पद्यमिदम् तेमरीच्यादयो मुनयोरि

म८

मालयमामंत्र्यपुष्पेषु पुनः शूलिनं महादेवं प्रेत्यत्र्यमूंसंशूलिने मिडुमर्थं गोरी वि
वाह वचनात्तृ रूपं प्रयोजनं व्रैयक पयित्वा तेन शूलिनाविस्तृष्टाश्राजज्ञाः स्व
माकाशं उपयपुरुत्येतरित्यर्थः अत्रेदमक्रमभंगः व महीभृतइति॥
इदमपितत्र्यमेवपद्यम् पुत्रवतोपिमहीभृतो हिमाचलस्य दृष्टिकास्य
नृ गोरीरूपेप्रपत्येत्संरिहत्वा पूर्तिं जगाम नप्रापेत्यर्थः अत्र दृष्टांतमा
ह अनंतेत्यादि स्थितोऽनंतपुष्पस्य मधोर्वसंतस्य संबंधिनी हिरेफाणां
भ्रमराणां मालापंक्तिः चूतेआम्रेसविशेषः सातिशयः संगआसक्तिर्यस्या
स्तथाभूताभवतीतिशेषः अत्रहिरेफमालासा दृश्यपातित्यर्थो वसंतदृष्टांते
नाध्यवसितावोध्या अत्रपुष्पसामान्यसत्तायोनहि विशेषादरइदृष्टांतेनत्याष्टु
तिके पिअपत्यसामान्यसत्ताभिधानार्थमपत्यवतत्र नतइत्येव वक्तुमुचितं
न तु विशेषतः पुत्रवतइतिदृष्टांतवैषम्यापत्तेः अतः प्रक्रमभंगः पा
र्थीयत्वं तेकथमिकवाचकतया गौरीणां न तु मान्यमितिबोध्यम् एतेनपु
त्रेसत्यपिकन्यायामधिकाप्रीतिरिति विवक्षणान्नदोषइतिसमाधानं

Marginal notes (left): त्रि॰ / का॰ टी॰ / उ॰ व / ९५ / थ्या

Marginal notes (right): राम / ९९

निरस्तमिति निह्नतं पल्लवितेन ४ विपदइति ॥ किरातार्जुनीये द्रौपद्या उक्तिः
अविक्रमं पराक्रमरहितं आपदा उपेतं युक्तं जनं आयतिरुत्तरकालभूतिः
रहयति त्यजति निरत्ययतेरायतिरहितस्य लघुतानीचता नियता अगरीया
न् गौरवहीनो जनः श्रियो लक्ष्म्याः परमाश्रयो न भवतीति शेषः अपे
ति युधिष्ठिरसंबोधनं अत्रापरिक्षयसमर्गप्रक्रमभंगः अगरीयानिति पा
ठोयस्यवेति ५ उदाचिति ॥ पार्थिवानां राज्ञां प्रस्थाने यात्रायां पुरो अग्रे भा
वि उपस्थमानं अशिवं अमंगलं नार्यः स्त्रियः अनेन प्रकारेण शंसन्ति सूचि
तवत्यः कथमित्याकांक्षायामाह काचित् स्त्रियादिकाविकीर्णरजोभिः कीर्णा
या मारजस्वलासती रिवमंतरितमनुविदधौ अनुचकार तस्याश्च परिजो
भिः रेणुभिर्व्याप्तत्वात् पतिवियोगदुःखेन भूमिपतनाद्रेणुभिः कीर्णास्य
त्येइति केचित् कीदृशीं मंदावक्रेंदोर्मुखे चंद्रस्य लक्ष्मीः शोभा यस्यास्तथा
भूता घोरपि मंदवक्रसदृशा चंद्रशोभा बोध्या काश्चिन्नार्यः अश्रीकाः शो
भाहीनाः दिशः रुचांतरीरंदधिरे दिग्ग्रहस्याप्यमंगलसूचकत्वात् कीदृ

शो ४

६ नातिहितसमगयामिलाषस्याज्ञातोदुष्यंतस्यसेमापतिंप्रतीयमुक्तिः तथोपक्रमेवाग्यनावदितिश्लोकशेषः सर्ववाक्यंबोधः महिषाः

द्वा४

शयः उद्धांतं सत्वं चित्तं यासां तथाभूताः दिक्पु वेऽउद्धांतानि सत्वानि प्राणि
नोयास्तत्तथाभूताइत्यर्थः सत्वंगुणोपि शावाँदो व स्त्वेद्रव्यस्वभावयोः प्रा
ण्वेव्यवसायेच चित्ते प्राणिषु जंतुष्विति विश्वः तथान्यानार्थः प्रतिप
दं वात्यारुवरुद्धः भ्रमणं चक्रुः एवमपरानार्थः भूमिवलयमानोद्ग
तोऽव्यात प्रक्रमभंगोप्यकृतः ९ नाहं तामिति॥ प्राक्कंतले प्रागमेश
कुंतलाद शीशेष्ठकुमेइवारं वारं ताडितं उत्फालितं निपानसलिलं कूप
समीपजलाशयसंवंधिजलं गाढं ताभालोड्य तेनाभाषगमेन प्रकृति
सोढंघातः सेयं महिषजातिरुक्ता एवमग्रिमयोरपि जातिकथयमप्वे
यंमच्छायायां व हंकदंबकं समूहो येन तत्तू स्मगकुलं रोमंथं उत्कलितक
वलचर्वणं अभ्यस्यत्त्वासात्यल्पायन परतयान्योन्यवर्तीन भिन्नं विस्र
न रोमंथं चाधुना तदपगमे सतिसंभूय स्थिता क्रमेण रोमंथाभ्यासं करो
तित्यर्थः वरं बानां व्रजाना कलनसान्यपदार्थतोपपत्तिः एवं वराह
तिभिः सूकरयूथैः विश्रब्धं विश्वासयुक्तं यथा स्यात्तथा पल्वले न्य

जाति =

का.टी.
उ.वं.
१०
१०८

अशिवं शापोऽस्तु
दिति संबंधः वा
ताम् मत्तास्त्वकंप
योरश्रुमस्यचक
त्वमुसितम् अत्र
कार्चित्श्लोकवत्
न प्रक्रमाद्यस्ते
धमाः एवं कंप
माना ४ ४

न४

गम
१०

विना॥

स्मरसि मृत्ताघाः प्रसिद्धोषधीविशेषस्यलानिलस्खलनं क्रियतां न यथाउदंता
नाविधरानवमेनाँशाकेअसमद्दनअशिष्टिस्तोज्याबंधोयस्य तथाभूतं सद्दि।
ष्टामंलभतां यद्दाअस्मदिति पंचमीबहुवचनांतं पृथक्पदं अस्मत्सकाशा
द्धिरूतं भवत्वित्यर्थः अत्रगाद्दतामिति कर्तृलिङः प्रसमा...तृक्रियतामित्यत्र
तद्गणः ७ धकलितेति॥ धनुर्भृतकुपिते भार्गवे अभ्यागते श्रीरामचंद्रस्यो
द्धिरियम् मुनेर्भार्गवेरोषादभिगच्छति अभ्यागतेसतिपातिः अर्थान्म
मत्रभिनवायानूतनायाधनुर्विद्यायाः स्पेस्तत्वमायप्रयोगपायगुह्यद्रूपायक
मेणोत्तरभसाराचेगास्फुरतिनमम्मनयापादयोरूपसंग्रहणायचस्फुरती
त्यन्वयः चहृयेन तस्यकालतामिव्यक्तिः किंभूतेनमुनी अकलितोअपरि
मितस्तपस्तेजसोवीर्यस्यप्रभावस्य प्रथिमामहिमायस्यैवंभूतेयशोनिधौ।
प्रतिष्ठिते तेनैनतज्जयाद्युत्कर्षाधिकं अविनश्वेनयथार्थेनमदेनदर्पेण
ध्मातेप्रदीप्तइत्यर्थः अत्रतपसः प्रथमोद्दिष्टत्वेनतद्धवितस्यपादोपसं
ग्रहणाप्यपिप्राथम्यमुचितम् क्रमस्यदेशसामान्यादितिपांचमिकर्त्रोटि या॥

का.टी.
तु. चं.
१०.१
(०)

तिप्रक्रमभंगः ८ इयमिति ॥ पूर्वैर्व्याख्यातम् अत्र त्वंशशाङ्कार्थं सेव शोभ्यतायां
समन्वयविचक्षणात् त्वं चेति पादक्रमो युक्तः स्वदल्लाभात्क्रमत्वं शक्तिःरि
ति यस्य राज्ञः सितकरखंडस्य हसितया श्वेतया कीर्त्या प्रकोपात् दूरत्वं प्रोच्य
व उक्तेव प्रयातं प्रकर्षेणाया तं दूरं गतमित्यर्थः अत्र कीर्तेः पत्नीत्वेनाध्यव
सानं बोध्यम् एवं शशाङ्कवादी नामप्यसत्त्वाधिकात्वेन कीर्तेः केतकाकांतायामा
दृशाङ्किरित्यादि हेतनाध्यवयंत्रसत्ता निस्त्रिंशः खड्ग एव निस्त्रिंशः क्रूरस्तज्ज्ञा
त्याशक्तिः सामर्थ्यमेव नाधिका तव भुजयुगले प्रतिवसतीत्यर्थे तेनेनान्वयः
असत्त्वं च क्रूरतायाः क्रूरस्वभावत्वात् त्रिंशतः पूरणात्त्रिंशः स निर्गतो यस्मा
त्समुदायात्स निस्त्रिंशः पुरुषसमुदाय स्तज्जन्याऊनत्रिंशत्पुरुषसमुदाय
जा वैश्यापुच्छीतियावदित्यर्थं इति महेशः तथा तव वक्त्रे दोषाकरस्य चंद्र
स्य श्रीरेव दोषनिधानभूता श्रीर्नाधिका प्रतिवसति तथा तव पार्श्वे एषा
प्रमत्ता महाकुटिनी महाच्छेदिके व्यभिचारस्य मदहूति खड्गयष्टिरेव ना
धिका प्रतिवसति तथा सर्वगा सर्वत्र प्रतिहतेव सर्वपुरुषगामिनीवे

राम
१०१

ग्धेतियावत् इयंतेभ्राज्ञात्रूपानाधिकापुरतोविलसति हृद्यासमद्रयैव
जरत्यामयातेनवकिंप्रयोजनमितीत्यन्वक्केतिघोज्यम् अत्रापीत्यंप्रोच्येति
क्रमउचितः ९ रामेति रघुवंशेश्रीरामहतायाताडकायावर्णनमिदम्
मन्मथइवरामोराममन्मथः सएवरमयतीतिरामोमन्मथस्तस्यशरेण
गाढुः सहेनहृदयेनाडितासानिशाचरीराक्षसीताडिकेवनिशाभिसारिका
जीवितेशेयमजीवितेशः प्राणेश्वरउपनाधिकस्तस्यवसतिंजगामेत्यन्वयः
कीदृशीगंधवद्रुधिरंतद्रूपंचंदनमेवगांधइकंचंदनंतेनोक्षितासिक्ता गंध
वत्वंचपूतनाधूमस्येवरुधिरस्यापिपापरत्यादित्याङ्कः अत्रत्रूप्यमानाना
मप्रकृतार्थानांप्रकृतवीभत्सरसविरोधिशृंगारव्यंजकत्वादमनपरार्थत्वं
दोषइति १० समाप्तंवाक्यदोषप्रकरणम् ॥ इदानीमर्थदोषाउपक्रम्यं
ते अतिविततेनेति ॥ रविर्जयतिकीदृक् अतिविततंविस्तृतंयद्गगनं त
द्रूपायांसरणौमार्गेप्रसरणेनगमनागमनेनपरिमुक्तस्त्यक्तोविश्रमा
नेदोविश्रांतिस्तत्वयेनतथाभूतः तथामरुताउल्लासितंप्रकाशितंसोर

६॰

का॰ टी॰
३॰ चं॰
१०२

१०२

ंयस्यतादृशस्याकमलानामाकरस्यहासस्कुद्धिकासकारीत्यर्थः अन्यानि
विकत्वसरणिवमंडलासितमौरभवानामर्थानामनपादानेपिप्रकृत
स्यात्ततेरपुष्टार्थत्वम् ११ सदेति ॥ स्वकाव्यस्यगंभीरचमत्कृतार्थशा
लितयातिस्फुटार्थकत्वाभावेपिदोषाभावंसमर्थयितुंकस्यचित्कवेरियम्
क्तिः तापतावनपरिचयाज्ञताम्ताम्यन्ताः अगाधगंभीरकाव्येमहताकवी
नांरुचयोविवृत्ताः तद्दकाव्यद्वयमहाकाव्ययोर्मिथोमसदृशेमहाकाव्ये
केनप्रकारेणाप्रमादंयान्तुगच्छन्तुस्वयंक्वाभवंतित्यर्थः कथंभूतारुचयः
सुजैनोविषयीकृतोमधुरःश्रृंगारादिरसोयाभिस्तथाभूताः तेननीरसत्वप
रिहारः ताःकाइत्यपेक्षायामाहसदेत्यादि यासांकविरुचीनांमध्येपक्षो
चरीभूतान्यमृततनिष्पंदवत्सरसाउद्दामाउद्भटगुणावक्रमार्गावैदर्भ्यादिरी
तिरयवतीडयंकविलचूपासरस्वतीपरिमलंचमत्कारंवहतीतिप्रकृतार्थः
अन्यस्त्वयासांरुचीनामादिमप्रभातांमध्येवक्रमार्गात्रिपथगाइयंगंगारू राम
पासरस्वतीनदीपरिमलंसंबंधंवहति तापतामेवपरिचिताः स्फुरितम १०२

म

धुरसाः स्फुरितोदञ्चोमधुरोरम्यपदार्थोयस्मिंस्तस्याम् तावामरतां हृदादृशादि।
त्मानां रुचयः प्रभाः केनप्रकारेण प्रसादस्वच्छकांतित्वं यान्तिविशेषणाद्धृ
यमन्तार्थम् अम्भस्तस्य जलस्य निष्यंदेन प्रवाहेण सरसा हृद्येति वार्थः मरे
प्रस्ता एवं विधा कविरुचयः केन मदीयकाव्येन प्रसादयांतितिस्वस्य नादरा
काव्यकरणा सामर्थ्याद्गुपायंभावज्ञाकस्यचिदिमाह ननु कथमितरकाव्य
वत्प्रसन्नाभवंत्वित्यादिवृत्तिसंदर्भविरुद्धं सरस्वती सरिद्भेदे स्त्री वाग्देवतयो
रपि स्त्रीरत्ने चापगायां चेति विश्वकोशात् नदीसामान्यवचनोपि सरस्वती
शब्दः अयं चार्थोऽन्ततन्त्रालक्षः १२ जगतीति ॥ मालतीमाधवे माधवस्यैय
मुक्तिः येऽस्येनवेंदुकलादयोभावाः पदार्थाजगति मनोमदयंति हर्षयंतिस्म आ
र्यादस्मेषांतेसंत्येव एवकारेणास्यस्य महोत्सवहेतवो न भवंतीत्यनादरः प्र
काश्यते कीदृशां जयिनः उत्कर्षशालिनः तथा प्रकृत्यैव मधुरा रमणीयाः
नवतर्हि किं महोत्सवहेतवस्तत्राह ममत्विति मम तु जन्मनिस एवैको महोत्स
वोयदियं मालतीविलोचनयोश्चंद्रिकारूपालोकेनयनविषयं यातानयन

का॰टी॰
३॰ वं॰
१०३
103

यौगोचरतां प्राप्नेत्यर्थः अत्र पूर्वमसारतयोक्तायाश्चंद्रिकाया मालत्यामारो
पोव्याहृतः १३ कृतमिति ॥ व्याख्यानमेतत् अत्रार्जुनार्जुनेति शोकसंबोधना
द्यैर्भवद्भिरित्युक्तानेषामिति परामर्शादर्जुनस्यापि प्राप्नेः किरीटीति पादार्थः पुनरुक्तः
अत्र केचित्कृष्णोक्तित्वेन परिहारमाहुः अहो ते वर्णिवेणीसंवरणपवाम्बर
स्याम्रडयमुक्तिः अस्त्रज्वालाभिरवलीढं व्याप्नं प्रतिबलं शत्रुसैन्यमेव जल
धिं तस्यांतमध्ये श्रूयमानेव वडवानलस्तस्मिन्सर्वधन्विनां मध्ये सकलधनु
र्द्धरश्रेष्ठानां गुरौ अस्मिन्नासि द्रोणे मम पितरि द्रोणे सेनानाथे सेनापतौ स्थिते
सतिसंभ्रमेण भयेनालं हे कृप समरं व्रजगच्छ हे हार्दिक्य कृतवर्मन् ते कांदा
मनुंच चापमेव हितीयं यस्य चापेक सहाये द्रोणे रणधुरं वहति सति भयस्य को
ऽवकाशोऽवसरइत्यर्थः अत्र चतुर्थपादः पुनरुक्तः १४ भूपालेति ॥ कस्यापि
दर्थिन उक्तिः हे भूपाल सुरत्नभूतत्वत्प्रहितनिर्गतं दैन्यं यस्मादर्थिनां तथाविधेन
कृष्टदानेन प्रथितः ख्यात उत्सवो यस्य तथाभूत राजन् मे तुरंगंत्प्रश्नं विश्राण
य देहि मरेनालसंमातंगं विश्राणयेत्यत्र संगः रत्नं स्वजातिश्रेष्ठेपीत्यमरः

म्न
तानेः

राम
२०३

अत्र तुरंगमातंगं वेति क्रमोल्लोकविरुद्धः १५ प्रदीपे कारि क्रुणोति ॥ कारयि
त्वा तोरं ग्राम हद्दोनि मज्जमन्त्रा वानत्तत्रेति त्यिवारो ज्यौतिषिकं प्रति प्रष्टुं चलि
तइति संस्कृतं अपक्रमो धर्मशास्त्रविरुद्धः स्वपितरीति न वोढा प्रतिरंतमि
क्तोः कस्यचिदुक्तिरियम् अयं जनम स्वोत्पोनिकटे स्थितो जनः यावत्स्वपि
ति स्वापं करोति तावदहं स्वपिमि लवतणया रमामीत्यर्थः तेन वकिमपीति दी
यते न तस्मात्कूपरं ज्ञातुमपि सांप्रतिमुचितं यथा स्यात्तथा आहर रवयेत्यर्थः
तथाकुंचितं संकुचितं कुन्त्वारितं शोकं उदंचय प्रसारयेति अयीति पादे संबो
धनं अयमर्थो ग्राम्यः १६ गृहीतमिति ॥ अश्वत्थामा द्रोणपुत्रः गजश्च तत्र
गजेमृते अश्वत्थामा हत इति युधिष्ठिरेणोक्तमाकर्ण्य द्रोणाचार्यः श्रांत्या पुत्र
शोकाच्छस्त्रसंन्यासं कृतवान् ततः शत्रुभिः स हतः द्रोणे हते शोकाविष्टस्या
श्वत्थाम्नः शास्त्रसंबोधयमुक्तिः हे शास्त्रयेन मम पित्रांलोचितमपि त्वास्मरण
त्वजानन्नुचितमपि त्वंदुपदन्तपशत्रोः परिभवभयाद्गृहीतमासीः यस्य
प्रभावान्नवकश्चित्त्रविषयोः नाभूत् अपितु सर्वो पीडादि स्त्वत्मात विषयो

का. टी.
तु. चे.
१.४
104

भूत् तेनपिपासितस्यममिथ्यामरणाज्जातशोकात् त्वंपरित्यक्तमसिनत्वभया
त्यक्तं यद्दर्शमपित्वांविमोक्ष्येयंतः यतोभवतेत्यक्तोस्यार्थः यतोयत्रभवतेस्वा
मिनंचविमोक्ष्येइतिवाक्यत्रयस्यसंशयस्थल्यागेरेतन्नौपात्इतिनिर्दिष्टवत्त्वम् ८
कृदंतइति ॥ कमलानांमातंकोभयंयस्मात्तादृशंवदनंयस्यास्तथाभूतेहे
सुंदरि अनेनवदनस्यचंद्रत्वंसूचितम् तस्मिन्करस्थितेहेस्तंकटकंकणमि
तियत्धियंधत्सेधारयसीदंतेकेनभ्रांतत्वतारकेनोक्तंकथ्यतामितिसंबंधः तत्
हिकिमेतदित्याकांक्षायामाह इदमिति इदंतव्यासिद्धंदुःसाधनानांजिते
यानामाक्रमणंवशीकारोयस्मात्तथाभूतंपरमास्त्रंचक्रंस्मरतिभ्रुवाकामे
नश्रीमतातवकरकमलमूलेविनिनिहितमित्यन्वयः अत्रचक्रस्यकामायु
धत्वमप्रसिद्धम् १८ मृसितेति ॥ राजानंप्रतिकवेरुक्तिः हेराजन्वस्यदृशि
शोभननयनायांकस्यांचित्नायिकायांकदाचनकस्मिंश्चिदवसरेकोमलदाम
हसिचंद्रिकाद्योतेस्वैरंशंकारादिनेनसकलंदृयांत्यांत्यांनयोतस्यामिसर्वसंकुर्वेत्या
मित्यर्थः अतएवस्मितास्यतिमेतावमन्तालंकारावत्रसंहितावलंका

कं०

राम
१.४

गयस्यास्तस्यामभूतायां सत्यां विप्रलब्धः अस्तंगतोभूत्तदनु तदनंतरं केनापि भवतः
कीर्तिरगीयत गीता येन कीर्तिमानेन तज्ज्योत्स्नाप्रकाशात्स्वाभिसारिकाशङ्का
न्याशंका स्वेनाभरणे लीकटस्पष्टभयं यया तस्यामभूतायां सत्यां प्रियेगृहमगात् भगव
तीअतस्त्वं कः कस्मिन् कस्मिन्देशे वसरे वा शुभप्रदो नासि न भवसि पिन सर्वस्मिन्नि
त्यर्थः अत्र कीर्तेर्ज्योत्स्नावत्प्रकाशनं कविसंप्रदायप्रसिद्धमित्यदोषः १९ उपेति ॥
अशोककलिकादर्शनमूर्छितस्य गृहमागच्छतः पथिकस्य तेनैव पथा जिगमिषू
न्प्रत्यन्यतीयमुक्तिः भो अध्वगाः गोदावर्यां गपरिसरे पर्यंतभूप्रदेशे सरणिं मार्गं
परित्यजत भवद्भिस्तावदपरो मार्गः अवेक्ष्यतां दृश्यतां तावदित्यर्थः यावदशोकां
कुरितः कुतइत्यत्राह हि यस्मादिह सरणौ कयापि हताशया वनितया रक्ताशो
कः चरणनलिनस्य चरणकमलस्य न्यासेनाघातेन उदंचितं उद्भूतं तोनवांकु
रएव कंचुकं सर्वांगव्यापितया यस्य तथाभूतो विहितः कृतः हताशयेत्यात्मावि
घातकतया रोषोक्तिः अत्र पादाघातेनाशोकस्य पुष्पोद्गमएव कविसमयो न
त्वंकुरोद्गम इति नैतत्कविप्रसिद्धेरुदाहरणम् २० सदेति ॥ निगदव्याख्यातं

का. टी.
उ. चे.
२०५
105

अत्र निमित्तं विनाशत्रोऽर्थमशास्त्रविरुद्धम् २१ अनन्येति ॥ यस्य बाह्वोर्भुजयो
रनन्यसदृशमनुपमं बलं समीक्ष्य तेन तस्य साधसिद्धो षाड्गुण्यानुसृतिः संधिविग्रह
यानासनद्वैधसंश्रयाख्यषाड्गुण्यानुसरणं निःप्रयोजनेति सत्यमित्यन्वयः षाड्गु
ण्यमिति स्वार्थे ष्यञ् अयमर्थो नीतिशास्त्रविरुद्धः २२ विधायेति ॥ अंगनाके
यूरं प्रसिद्धमंगदं दूरे विधाय अनंगांगदरूपां कान्तेन कृतां करजानां नखानां मृदे
खानां क्षतानां मालिकां पंक्तिं बभार धृतवतीत्यन्वयः अनंगांगदमिति अनंगा
यांगदरूपमेव अनंगस्यांगदं वा बाहुभूषणमिति विशेषणार्थः अनंगांगतमिति वा
पाठः तत्रापि केयूरविशेषणत्वमिति केचित् अत्र केयूरस्थाने नखदानं काम
शास्त्रविरुद्धम् नखक्षतस्य स्थानानि कक्षौ वक्षस्तथा गलः पार्श्वौ जघनमूरू च
स्तनगंडललाटिका इति वात्स्यायनोक्तस्थानभिन्नत्वात् २३ अष्टांगेति ॥ य
मनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाण्यष्टावंगानि यस्य
तथाभूतस्य योगस्य परिशीलनेनाभ्यासेन यत्कीलनं स्थिरीकरणं तेन दुःसाध्या
या दुःप्रापायाः सिद्धेर्मुक्तिरूपायाः सविधं निकटस्थं पुरुषमात्रविश्रान्तम

राम
२०५

तयो

नोद्रूपवृत्तिरूपमसंप्रज्ञातयोगं विदूरे विदधत् तमनपस्यैव स्वाभिमतां कार्य
ममर्थ्यां विवेकख्यातिं प्रकृतिपुरुषयोर्भेदज्ञानरूपां आसादयन् प्राप्नुवन्
सन् समाधिधनानां योगिनां योगिनां मौलिमणिः श्रेष्ठः कश्चिदधुना विमु
क्तरूपत्वयः दुःसाद सिद्धयोगिमार्गालसान्निध्यं वर्जयन्नित्यर्थः इति केचित्
अत्र विवेकख्यात्यनंतरं संप्रज्ञातासंप्रज्ञातयोगावनपेक्ष्य भक्तिकथनं योगशा
स्त्रविरुद्धम् वितर्कविचाराद्यनुसारी संप्रज्ञातयोगः २४ प्राप्ता इति॥ शां
तस्य भर्तुर्हरेरियं भक्तिः॥ सकलकामदुघाः सकलकामदायिन्यः श्रेयः
संपदः प्राप्तास्ततस्तेन किं कः पुरुषार्थः भक्तिं विना कृतकृत्यतायाः अभा
वादिति भावः एवमग्रेऽपि विहितशास्त्राणां शिरसि पदं दत्तं तेषामाक्रम
णं कृतमिति यावत् प्रणयिनो मिथ्याचारविभवैः समृद्धिभिः तनुभृतां अ
शरीरिणां तनुभिः शारीरैः कल्पं प्राप्य स्थितं जीवितं ततोऽपि किमित्यर्थः अ
यततः किमिति पुनः पुनरुक्त्या अनवीकृतत्वं २५ यदीति॥ सतां अवि
घादिताविषादशून्यता कृतिरेव नाश्चर्यकरी अत्रोपमानभूतं वाक्या

पृ

का॰टी॰
र॰वे॰
२॰९
106

र्थेऽत्र यस्य पन्नगस्यालिपदीनामादिना एवं च यथाग्निर्लोवह्निर्यैदिदहति
अत्रार्थे किमद्भुतमाश्चर्यं न किमपीत्यर्थः यदि चाद्रिषु पर्वतेषु गौरवम-
स्तीति शेषः ततः किं तदपि नाद्भुतमित्यर्थः महोदधेरंबुसदैव लक्षणं
क्षारं च तत्तदपि नाद्भुतं तथा सततामविषादिता प्रकृतिरेवेत्यर्थपर्यवसा
नबोध्य अत्रैक एवाश्चर्यीभावो भंगिभेदेनोक्त इति नवीकृतत्वसत्वाच्च दो
षः २९ यत्रेति ॥ तस्य मणेश्चिंतामणेः आभासेनेषत्कांतिमात्रेण म-
णय एव मणित्वेन कल्पिता ये अश्मानः पाषाणास्तेषु मध्ये सत्त्वमेवोचि
तं न तन्मणित्वमु चिंतामणेः मणिगणनायां गणनमनुचितमित्यर्थः
तस्य कस्येत्यपेक्षायामाह यत्रेति यत्र चिंतामणौ सति एतस्य कल्पविधे
निर्माणं सृष्टिः न तु लिखिता निर्दिष्टा ग्रावाभ्यासमयस्य तथाभूतं भवतीति
शेषः प्रयोजनाभावेन नामाग्रहणात् अनुल्लिखितार्थमिति पाठे अनु
ल्लिखितो निर्दिष्टः अर्थः प्रयोजनं यस्यैतदप्रयोजनकमित्यर्थः अथ
वा यत्र यद्विषयकं विधेर्निर्माणं अनुल्लिखितार्थं अनिर्वचनीयप्रयोजन

राम
२॰९

नमित्यर्थः तथा यच्चमणेरुत्कर्षस्य प्रतियोगिनो ऽवधेः कस्यचित्कल्पनमपि
परान्यक्कारस्यावज्ञाया कोटिकष्टं सर्वोत्कृष्टतया यत्किंचिन्निरूपिणोत्कर्ष
कथनस्यापकर्षहेतुत्वात् उत्कर्षप्रतियोगिनः प्रतिसंबंधिनः सदृशस्येत्य
र्थः कल्पनं कथनं परान्यक्कारस्य कोटिः निरुपमत्वरत्ने विति केचित् त
थाय स्य मणेः संपदः प्राणभृतां प्राणिनां मनोरथगतो ऽहल्लेखोमोतिक्र
मयातः मनोरथस्याप्यगोचरा इत्यर्थः अत्रान्योक्तौ आभासमात्रे णोति।
वाच्यम् अन्यथा निंदनीयानां मणीनां गणानंतरमवच्छेदाप्रतीतेः २७
वक्त्रांभोजमिति॥ मृगयायां पिपासुं राजानं प्रति कवेरुक्तिः हे अवनिपते त
वांतः स्वच्छे सत्वगुणप्रधानत्वात् स्वच्छे निर्मले मानसे अंतःकरणे एव मानसे
सरसि सतिरभीतां पुनः पुनरंबुपानस्याभिलाषः कथं भवतीति शेषः
जलाधारतयात्वपिपासा न चितेतिभावः अनेनौचित्यातिशयं प्रतिशायं
प्रतिपादयितुमाह वक्त्रेत्यादि तव वक्त्रांभोजं सरस्वती भारती एव नदी वि
शेषः सदाधिवसति तेन वाधरः शोणो रक्त एव शोणो नद एव तेद्दति

व स्य

णोऽदक्षिणादिकस्य पूर्वामेतरोवाङ्कुरः मृद्वयाराजविद्धभनयासहितएव
समुद्रोजलधिः कीदृशः काकुत्स्थस्य रामस्य वीर्यस्मृतेः करणेपटुः समर्थः न
ह्यङ्कस्मारणात् एवंसमुद्रोपिवंधनात्तथाभूतः एतावाद्दिग्यः सेनापवन
यः भवतः पांसुलानामपिनेवमंचतित्यजतीत्यर्थः श्रवणेणएवेत्यवधारण
मनुचितम् अन्यजल्पाशयव्याहृतेः पिपासानैरोचित्यातिशयप्रतिकूलत्वा
त् २८ एषामामिति ॥ विद्धशालभंजिकाख्यनाटिकायांमृगांकावलीवि
योगातुरस्यराज्ञोविद्याधरमल्लदेवस्येयमुक्तिः भोइत्याकाशसंबोधनम्
भोजनाः संतोइदंवैनेर्मशीनांकूर्चकेस्तलिकाभिः चूर्णैरितिमदेषाः एषामं
रात्रिंचंद्रिकाधवलांएणमलिमानंश्यामत्वंनामानयत प्रापयतेत्यर्थः अथे
तिविकल्पेमंत्रमथवातंत्रंवैद्यकादिशास्त्रं प्रयुज्यतइत्यौषधप्रयोगंकृत्वे
त्यर्थः तंत्रमोषधमित्यन्ये स्वेतानामत्यल्पानांशीघ्रंयंशोभाहरतनाशयत
रुचमितिपाठेरोमंचंद्रंचशिलापट्टकेकृत्वानिधायसत्तणकणशश्चूर्णेय
तयेनैवंविधकरणेनाहंतस्यामृगांकवल्याववक्रमृद्वयावदनरूपवि

द्वेनां किनादशारिद्योद्गुणेत्वमासमर्थो भवामि भावनोपनीतं तन्मुखं दशारदि
त्वपथपतञ्चंद्रिकादिभिरूपट्टीपकन्तर्पसंतापकैः क्रियमाणं प्रतिबंधमङ्करी
ष्यामि तदपनयमैत्तोपहृतेत्यर्थः अत्रज्योत्स्नाद्रूपराशिविशेषस्य विवक्षितत्वा
द्विशेषणवज्योत्स्नाभित्यभिधानमनुचितम् अन्यथा विशेषस्य प्रतीतौ विलंबा
पत्तेः यत्तु श्यामायाः श्यामलीकरणं सामर्थ्यमिति द्रूषकबीजमित्याहुस्तदयुक्तं
एवं सति रात्रिं श्यामलिमानमित्यस्याद्गुणत्वापत्तेरिति २५ कल्लोलेति॥ दे
मकराणामालयसमुद्रकल्लोलैस्तरंगैः वेल्लितानां दृषदां पाषाणानां परुषैः
कठोरैः प्रहारैः रत्नानि स्वाश्रितानि रत्नानि मा यत्र व्यथा मामाश्रवज्ञीकृत तदल्पपेक्षा।
यामाह किमिति भवतः कौस्तुभाख्येन रत्नेन पुरुषोत्तमः श्रीकृष्णोपि याञ्चा
र्थे प्रसारितः करो येन तथाभूतः किं नाम न विहितः अपि तु विहित एवेत्यर्थः
तथा चैकैकरत्नेनैवं विधोत्कर्षलाभादन्येषामपि रत्नानामवमाननं नोचित
मित्यर्थो विवक्षितः स च कौस्तुभेनेति विशेषतो विधानेन निर्वहति कौस्तुभ
स्योपकारित्वेप्यन्यरत्नसामान्यावमाननिषेधायोगात् कौस्तुभस्यरत्नसा।

का॰ टी॰
उ॰ चे॰
१.८

108

मान्यां तद्गतत्वेन प्रतीतेः एकेन किमिति पाठे तेन या प्रतीतिर्न दोषः उ-
अर्थिवदिति॥ सीताप्राप्तेर्निराशस्य रावणदूतस्य कौष्कलस्येयमुक्तिः अ-
र्थित्वमस्येषणाद्याचकत्वे प्रकटीकृतेपि प्रभोः रावणस्य फलप्राप्तिः सीता-
लाभो नास्ति प्रत्युत विपरीतं दुःखानुसूकेन ताडकादिवधेन द्रोहकारी वि-
रुद्धं चरितं यज्ञादिरक्षणरूपं यस्य तथाभूतो दाशरथिस्तया प्रार्थ्यमानया
कन्यया सीतया युक्तः दाशरथिरिति पितृसंबंधोक्तितेनेन स्वतः स्वातन्त्र्यभा-
वादपकर्षसूचनम् स्वप्रार्थितं स्वयं न लब्धं किंत्वन्यगामीति विपरीतस्य च
परस्य शत्रोरुत्कर्ष आत्मनश्च मानयशसोर्विस्रंसनं भ्रंशः क्षीरत्वं च सीता
त्वं जगतां पतिर्दशास्यो देवः कथं मृष्यते तन्मतेन कथंचिदित्यर्थः अत्र
क्षीरत्वेन अमर्षयोगेन क्षीरत्वमपेतमित्यर्थसाकांतम् ३२ आज्ञेति॥
वीरचरितं संस्येव बहवो गणास्तथापि बलवानेकदोषस्तानपवदतीत्युप-
क्रम्य रावणाहूतं प्रतिजनकपुरोहितस्य शतानंदस्येयमुक्तिः यस्य रावणा
त्माज्ञा शक्रसिंहस्य शिरसा मंत्रोपनामनीयया शिरोधार्येतियावत् प्रणा

राम
१.८

यित्वेनचरणादंप्रत्योगविच्छेदसूचनम्‌ शास्त्राण्येवनवं चक्षुः शास्त्रदृष्टेः।
रावरणात्‌ बहुवचनैकवचनाभ्यां सर्वशास्त्रविषयकज्ञानसूचकम्‌ नवत्वेना
भ्रांतत्वंसूच्यते भूपतौसकलशास्त्राणिनामीषद्धरे पिनाकिनि हरेभक्तिः लंकेतिप्र।
